ISSN – 2349-3100 Peer Reviewed

नवमोऽङ्कः Refereed Journal

अन्ताराष्ट्रियमूल्यांकितत्रैमासिकसन्दर्भितशोधपत्रिका

# वेदज्योतिष्मती

Vedajyotishmati

**संरक्षकाः**

**प्रो. रामचन्द्रझाः, प्रो. रामदेवझाः,**
**प्रो. देवेन्द्रमिश्रः, प्रो. शिवाकान्तझाः**

**प्रधानसम्पादकः**

**प्रो. हंसधरझाः**
आचार्यः, ज्यौतिषविभागः, राष्ट्रियसंस्कृतसंस्थानम्
भोपालपरिसरः।

**सम्पादकः**

**डॉ. आशीषकुमारचौधरी**
असिस्टेंट-प्रोफेसर, ज्यौतिषविभागः,
क.जे.सोमैया संस्कृतविद्यापीठम्, मुम्बई।

**प्रकाशकः**

**संस्कृत-अनुसंधान-संस्थानम्, के. एम. टैंक लहेरियासरायः, दरभंगा**

## सम्पादकमण्डलम्

1 **प्रो.बोधकुमारझाः**
आचार्य, व्याकरण-विभाग,
क. जे. सोमैया-संस्कृतविद्यापीठ, मुम्बई ।

2 **प्रो. हंसधरझाः**
ज्योतिष विभाग ,आचार्य,
राष्ट्रिय संस्कृत संस्थान , भोपाल परिसर, भोपाल।

3 **प्रो. प्रमोदवर्धनकौण्डिल्यायनः,**
विभागाध्यक्ष, मीमांसा दर्शन विभाग नेपाल,
नेपाल संस्कृत विश्वविद्यालय, काठमाण्डु, नेपाल ।

4 **जूही जेनोजे**
आचार्या,दर्शन विभाग,
कोरिया विश्वविद्यालय, सीओल, कोरिया ।

5 **डॉ. प्रवेशसक्सेना**
पूर्व आचार्या,संस्कृत विभाग,
जाँकिर हुसैन महाविद्यालय
दिल्ली विश्वविद्यालय।

6 **डॉ. धनञ्जयमणित्रिपाठी**
आचार्य ,संस्कृत विभाग,
मोदी विश्वविद्यालय, राजस्थान ।

7 **डॉ. दिलीपकुमारझाः**
विभागाध्यक्ष-धर्मशास्त्र विभाग
कामेश्वर सिंह संस्कृत विश्वविद्यालय, दरभंगा ।

8 **डॉ. राजीवमिश्रः**
प्राचार्य, सन्तनागपाल संस्कृतमहाविद्यालय,
एवं शोध संस्थान, सम्पूर्णानन्दसंस्कृत
विश्वविद्यालय, नई दिल्ली।

9 **टेल्टो डेल्टेज**
आचार्य दर्शन एवं संस्कृति विभाग,
हेल्डमार्ग विश्वविद्यालय,हेल्डनवर्ग, जर्मनी।

10 **प्रो. विद्यानन्द झाः**
प्राचार्य,
भोपाल परिसर, भोपाल।

**पुनर्वीक्षणमण्डलम्**

1. **आचार्यरामदेव झाः**
पूर्व आचार्य ज्योतिष विभाग,
लालबहादुर शास्त्री, राष्ट्रिय संस्कृत विद्यापीठ, दिल्ली ।

2. **आचार्य नीलाम्बर चौधरी**
आचार्य रामभगत राजीवगाँधी महाविद्यालय दरभंगा।

3 **आचार्या प्रवेश सक्सेना**
आचार्या ,जाँकिर हुसैन महाविद्यालय
दिल्ली विश्वविद्यालय,दिल्ली।

**प्रबंधक संपादक**

1. **श्री पंकज ठाकुर**
2. **किरण मिश्रा** ल.ना. मि.वि दरभंगा।

**परापर्शदातृसंपादकः**

1. **डॉ. रंजय कुमार सिंह**
रा. सं. संस्थान, मुम्बई।

**सहसंपादिका**

1**डॉ गीता दूबे** ,रा. सं. संस्थान, मुम्बई।

**सम्पादकसहायकः**
**श्रीसत्यनारायणः**


**वर्षम्- MAY 2016**

@copy right – Sanskrit Anusandan Sansthan

Email – rsas.kothram@gmail.com, vjvv.rs@gmail.com,
Ph No. 06272-224671, 09619269812, 07506137027 **मूल्य**-300/

पत्रिका में प्रकाशित लेखों से प्रकाशक का सहमत होना अनिवार्य नहीं है। विवाद का समाधान दरभंगा न्यायालय से ही स्वीकार्य है ।लेखों को परिवर्तित, स्वीकृत एवं अस्वीकृत करने का पूरा अधिकार प्रकाशक को होगा ।A Trilingual Educational Sanskrit Research Journal Published by the Sanskrit Anusandhan Sansthan, Darbhanga

**From letter no-671/2014-15 Place on Rashtriya Sanskrit Anusandhan Sansthan will kown as the Sanskrit Anusandhan Sansthan, Darbhanga**

# सम्पादकीयम्

सुरगीरियं नाद्यैवापितु वैदिककालादपि पूर्वत एव लोके वेदे च प्रथितमिति निर्विवादम्। किं वा संस्कृतभाषाया देवभाषात्वात्स्पष्टं वक्तुं शक्यते यद्गीरियं सृष्ट्यारम्भकालादेव विकसिता, देवानां सृष्ट्यारम्भकालत एव विद्यमानत्वात्। जगकत्यस्मिन् यावन्त्युपलब्धानि सन्ति प्राचीनतमानि ज्ञानानि तानि सुरभारत्युपनिबद्धानि। तत्र खलु ऋग्वेदः प्रत्यक्षं प्रमाणम्। पुनश्चान्ये यजुस्सामाथर्ववेदाः, उपनिषदः, ब्राह्मणग्रन्थाः, पुराणोपपुराणानि, चरकसुश्रुतादय आयुर्वेदग्रन्थाः, शिक्षा-कल्प-व्याकरण-च्छन्दो-निरुक्त-ज्योतिषशास्त्ररूपवेदाङ्गानि, कल्प-कात्यायन-पारस्कर-बौधायन-आपस्तम्ब-वैखानस-काठकादिसूत्रग्रन्थाः, गौतम-बौधायन-वसिष्ठ-वैखानसादिधर्मसूत्राणि, सर्वमपि देवभाषोपनिबद्धानीत्यपि नाविदितं विज्ञैः। अर्थाद्वक्तुं शक्यते मुक्तकण्ठेनेदं यत् संस्कृतभाषा भाषानिकरे आदिभाषा। भाषेयं सर्वासां भाषाणां जननी। किं वा याः का अपि भाषा जगत्यद्य प्रचलिताः सन्ति तासां सर्वासामपि भाषाणां स्रोत इयमेव सुरगीः।।

तद्भाषोपनिबद्धं प्राक्तनं ज्ञानं कथं सुरक्षितं स्यात्, कथं ब्रजेत्समृद्धिमियं भाषेत्यभिलषद्भिर्विपश्चिद्भिः क्रियन्ते ग्रन्थ-पत्रिकादीनां प्रकाशनं काले काले पुराकालादेव। तस्मिन्नेव क्रमे दरभङ्गामण्डलान्तर्गत-लहेरियासरायस्थ-संस्कृतानुसन्धानसंस्थानेन अन्ताराष्ट्रिय-मूल्याङ्कित-त्रैमासिक-सन्दर्भित-शोधपिका वेदज्योतिष्मतीनामधेयाऽनवच्छिन्न-रूपेण प्रकाश्यत इति महत्तोषकरम्। तत्रापि ऐषमो नवमोऽयमङ्कः पाठकानां हस्ते नियतकालेनैव गच्छतीति स्वान्ताह्लादकारि। आशासे भारतीयप्राच्यार्वाचीनज्ञानगुम्फितो विपश्चदां गभीरज्ञानोद्भूतैर्विविधलेखैर्विलसितोऽयं नवमाङ्कोऽपि पाठकानां मनोरञ्जकः स्यात्।

एवमस्मिन् पत्रिकाप्रकाशनरूपयज्ञकर्मणि ये खलु मुख्यभूताः सन्ति कार्यकर्तारस्तेषां कृते हृदयेनाशेषं साधुवादं वितीर्य विशेषेण साशिषं धन्यवादं वितनोमि युवदैवज्ञाय समुत्साहिने डा. आशीषकुमारचौधरीमहोदयाय, यः खलु अत्यन्तं मनोयोगेन पत्रिकायाः प्रकाशने नैजं दायित्वं निरवहत्। अथ च साधुवादान् वितरामि तेषां समेषां सज्जनानां कृते ये खलु पत्रिकाया अस्याः प्रकाशने प्रत्यक्षरूपेण परोक्षरूपेण वा कृतवन्तःसाहाय्यम्। पुनश्च विशेषेण कार्तज्ञं विभर्मि तेषां निखिलानां सुधियां लेखकानां प्रति येषां ज्ञानविज्ञानमयलेखबलेन पत्रिकेयं नैजं गौरवं विभर्ति।

अन्ते च कामये भगवन्तं महाकालं यदेवमेव ज्ञानविज्ञानोद्भासकसारगर्भितविपश्चिल्लेखरञ्जिता पत्रिकेयं प्राकाश्यमधिगच्छन्ती अशेषकालं यावल्लोकानुरञ्जिनी स्यादिति शम्।

**वेदज्ज्योतिष्मतीत्यस्याः पत्रिकायाः सतां प्रियः ।**
**नवमाङ्कोऽपि लोके स्याच्चिरं चित्तानुरञ्जकः।।**

गुणैकपक्षपातिनां सहृदयानां विदुषां शुभाशंसनमपेक्षमाणः-

(प्रो. हंसधर झाः)

**प्रधानसम्पादकः**

 ISSN – 2349-3100

## विषयसूची पृष्ठसंख्या


| | | |
|---|---|---|
| सम्पादकीयम् | प्रो. हंसधर झाः | 3 |
| सिंह-मकरस्थगुरुदोषमीमांसा | प्रो. हंसधरझाः | 5 |
| पुराणसाहित्यस्योपयोगिता | डा. दिलीप कुमार झा | 9 |
| वैदिकशिक्षायाः समालोचनात्मकविश्लेषणं वर्तमानशिक्षायां तस्याः प्रासङ्गिकता च | Dr. V S V Bhaskar Reddy | 12 |
| सूर्य सिद्धान्त का विशिष्ट सन्दर्भ और नवविध कालमान | डॉ. राजीव रंजन | 17 |
| व्याकरणज्योतिषयोरालोके आजीविकाविचारः | योगेशकुमार | 22 |
| काव्यलक्षणविमर्श: | डा.स्वर्गकुमारमिश्र: | 24 |
| वैदिकसाहित्ये वास्तुसंगीतकलयोर्विमर्शः | डॉ. शैलेन्द्रप्रसाद उनियालः | 28 |
| सामुद्रिकशास्त्र का ऐतिहासिक परिचय | डा.आशीष कुमार चौधरी | 33 |
| **A Comparative study of Physical Fitness between Tribal and Urban Senior College Girls Student of Mumbai University** | **Dr. M. S. Gomchale Andhale Shankar Baburao** | 36 |

# सिंह-मकरस्थगुरुदोषमीमांसा

✍प्रो. हंसधरझाः

## 1. सिंहस्थगुरुदोषविचारः

कालशुद्धाशुद्धिविचारक्रमे सिंहस्थगुरुदोषविचारोऽपि अत्यन्तं महत्त्वं भजते। अर्थाद् यदा गुरुः सिंहराशौ भवति तदा विवाहादिशुभकार्याणि न विधेयानीति सामान्यो नियमः। यथा वराहमिहिरः[1] कथयति-

**उद्यानचूडाव्रतबन्धदीक्षाविवाहयात्रा हि वधूप्रवेशः। तडागकूपत्रिदशप्रतिष्ठा बृहस्पतौ सिंहगते न कुर्यात्।।**

अर्थादुद्यानम्, चूडाकरणम्, उपनयनम्, दीक्षाग्रहणम्, विवाहः, विशेषयात्रा (प्राथम्येन देशविशेषस्य यात्रा), वधूप्रवेशः, तडाग-कूप-देवप्रतिष्ठेत्यादिशुभकर्माणि सिंहस्थे गुरौ न विधेयानि। किञ्च सिंहस्थे गुरावत्र नियतकालिकं कर्मकरणे न दोषो भवतीति विशेषः। यथा शाङ्र्गीये लिखति[2]-

**सीमन्तजातकादीनि प्राशनान्तानि यानि वै। कर्तव्यानि न दोषोऽस्ति पञ्चाननगते गुरौ।।** इति।।

अर्थात् सीमन्त-जातकर्माऽन्नप्राशनादयस्तथाभूताः संस्कारा ये निश्चितसमयाभ्यन्तरे विधीयन्ते, ते सर्वेऽपिसंस्कारा विधेया एव, यदि गुरुः सिंहराशावपि भवेत्।

### क. सिहस्थगुरोः प्रकारत्रयेण परिहारः

प्राच्यर्षिभिः सिंहस्थगुरोः प्रकारत्रयेण परिहार उक्तः- अंशभेदेन, देशभेदेन सूर्यराशिभेदेन च।

**सिंहस्थगुरोः प्रथमः परिहारः- अंशभेदेन**

उपर्युक्तवचनेन तु स्पष्टं प्रतीयते यत् सिंहस्थगुरुर्विवाहादिशुभकार्येषु त्याज्यो विद्यत इति। किन्तु ऋषीणां वचनान्तरदर्शनात् सा प्रतीतिर्निरस्ता जायते। यतो हि वचनान्तरेण स्पष्टीकृतम् यत् सिंहस्थे गुरौ यदा गुरुः सिंहराशेर्नवांशे भवति तदैव विवाहादिशुभकर्माणि त्याज्यानीति। यथा[3]-

**सिंहराशौ तु सिंहांशे यदा भवति वाक्पतिः। सर्वदेशेष्वयं त्याज्यो दम्पत्योर्निधनप्रदः।।** इति।।

वस्तुतो यदि सिंहस्थस्य गुरोः सम्पूर्णः कालस्त्याज्य इत्याशयः अभविष्यत् तदा पुनस्तत्रस्थो नवांशस्त्याज्य इति कथम् अलिखिष्यत्? एतेन ऋषीणामभिप्रायः स्पष्टो यत् सिंहस्थे गुरौ यदा सिंहस्य नवांशे भवति गुरुस्तदैव विवाहादिशुभकर्म त्याज्यमिति। अर्थात् तदतिरिक्ते काले सिंहस्थे गुरावपि विवाहादिशुभकर्म कुर्यादिति भावः। एतस्य भावस्य स्पष्टीकरणमधोलिखितेन राजमार्तण्डस्य वचनेन स्वतो जायते। यथा[4]-

**सिंहेऽपि भगदैवत्ये गुरौ पुत्रवती भवेत्। अत्यन्तशुभगा साध्वी धनधान्यसमृद्धिदा।।** इति।।

एवं निष्कर्षरूपेण वक्तुं शक्यते यत् सिंहराशौ सिंहराशेर्नवांशे यदा भवति गुरुस्तदा विवाहादिशुभकर्म न विधेयमिति।।

**सिंहस्थगुरोः द्वितीयः परिहारः- देशभेदेन**

एवमंशभेदेन सिंहस्थगुरोः प्रथमः परिहारः कथित एव, सम्प्रति देशभेदेन तस्य द्वितीयः परिहार उच्यते। अत्र ध्यातव्यमिदं यदुपर्युक्तसिंहराशिनवांशस्थगुरोर्यत्त्याज्यत्वमुक्तं तन्न सार्वत्रिकं किञ्च देशविशेषेष्वेव । अर्थात् सिंहराशिनवांशगते गुरावपि सर्वत्र विवाहादिशुभकार्याणि न त्याज्यानि, किन्तु केषुचिद्देशेष्वेव त्याज्यानि। यथा आचार्यलल्लस्य वचनम्[5]-

**गोदावर्युत्तरतो यावद् भागीरथीतटं याम्यम्। तत्र विवाहो नेष्टः सिंहस्थे देवपतिपूज्ये।।** इति।।

अर्थात् गोदावर्या उत्तरे तथा गङ्गाया दक्षिणे (गङ्गागोदावर्योर्मध्ये) स्थितेषु देशेषु एव सिंहस्थगुरुजन्यदोषो भवति, नान्यत्र इति वचनस्यास्याशयः।अत्र वसिष्ठस्यापि वचनं यथा[6]-

**भागीरथ्युत्तरे कूले गौतम्या दक्षिणे तटे। विवाहो व्रतबन्धो वा सिंहस्थेज्ये न दुष्यति।।** इति।।

**सिंहस्थगुरोः तृतीयः परिहारः– सूर्यराशिभेदेन**

सिंहस्थगुरोस्तृतीयः परिहारः सुर्यस्य स्वोच्चराशिस्थत्वादुक्तम्। अर्थात् सिंहस्थे गुरौ सति यदि सूर्यः स्वोच्चराशौ मेषे भवति तदा सिंहस्थगुरुजन्यदोषो न भवति। तदत्रोपरि देशविशेषे नवांशजन्यो यो दोष उक्तस्तदपि न भवति। अर्थात्तदानीं मेषराशिस्थे गुरौ गङ्गागोदावर्योर्मध्येऽपि सिंहस्थगुरुजन्यदोषो न जायत इति भावः। यथा ज्योतिर्निबन्धस्याधोलिखितं वचनं द्रष्टव्यमस्ति[7]-

**मङ्गलानीह कुर्वीत सिंहस्थो वाक्पतिर्यदा। भानौ मेषगते सम्यगित्याहुः शौनकादयः।।** इति।।

पुनस्तत्रैव[8]-

**सिंहगते सुरमन्त्रिणि कन्या मेषगते तपने परिणीता। भूषणरत्नयुता च सुशीला सत्यवती सुखकीर्तिसमेता।।** इति।।

एवमेव वसिष्ठोऽपि कथयति[9]-

**करस्य ग्रहणं कार्यं सिंहस्थो वाक्पतिर्यदा। भानौ मेषगते शस्तमित्याहुः शौनकादयः।।** इति।।

उपर्युक्तान् त्रीनपि परिहारान् एकस्मिन्नेव श्लोके प्रतिपादयँल्लिखति दैवज्ञरामाचार्यः, यथा[10]-

**सिंहे गुरौ सिंहलवे विवाहो नेष्टोऽथ गोदोत्तरतश्च यावत्। भागीरथीयाम्यतटे हि दोषो नान्यत्र देशे तपनेऽपि मेषे।।**

अर्थाद् गुरुर्यदा सिंहराशौ सिंहस्यैव नवांशे स्यात्तदा गोदावर्या उत्तरे तथा गङ्गाया दक्षिणे देशे एव (उभयोर्मध्यवर्तिदेशे) शुभकर्म त्याज्यम्, न तु अन्यत्रदेशे। किन्तु सिंहस्थे गुरौ यदा सूर्यो मेषराशिगतः स्यात् तदा गङ्गागोदावर्योर्मध्यवर्तिदेशेऽपि सिंहस्थगुरुजन्यदोषो न जायत इति।

अत्र ध्यातव्यं यत् साम्प्रतिक-बस्तर-मध्यप्रान्त-मध्यभारतोत्कल-दक्षिणबिहारप्रान्तीयाः प्रदेशाः गोदावरीगङ्गानद्योरन्तरालवर्तिनो देशा अवगन्तव्याः।

**ख. सिंहस्थगुरुदोषस्य देशविशेषे अनिवार्यता**

सिंहस्थगुरोश्चरणभेदेन दोषजनकतां तथा देशविशेषे तस्य अनिवार्यतां स्पष्टयँल्लिखतिदैवज्ञरामाचार्यः[11]-

**मघादिपञ्चपादेषु गुरुः सर्वत्र निन्दितः। गङ्गागोदान्तरं हित्वा शेषाङ्घ्रिषु न दोषकृत्।।**
**मेषेऽर्के सद् व्रतोद्वाहौ गङ्गागोदान्तरेऽपि च। सर्वः सिंहगुरुर्वर्ज्यः कलिंगे गौडगुर्जरे।।** इति।।

अर्थात् मघायाः प्रथमचरणतःपञ्चचरणेषु (मघायाश्चतुर्षु चरणेषु तथा पूर्वफाल्गुन्याः प्रथमश्चरणे) यावत्तिष्ठति गुरुस्तावदेव निन्दितः कालो ज्ञेयः। तदनन्तरं पूर्वफाल्गुन्या द्वितीयचरणादुत्तरफल्गुन्याः प्रथमचरणपर्यन्तं सिंहस्थे गुरौ गर्हितो न भवति। अथवा एवमत्रावधेयम्- 4.00.00.00 राश्यादितः 4.16.40.00 राश्यादिपर्यन्तं यावत्तिष्ठति गुरुस्तावदेव समयो गर्हितो ज्ञेयः, किन्तु 4.16.40.00 राश्यादितः 5.00.00.00.पर्यन्तं स्थिते गुरौ न गर्हितः काल इति।

**ग. परिस्थितिविशेषे सिंहस्थगुरोः दोषकारकत्वाभावः**

शौनकीयपटले तु एवमप्युक्तम् यत्, यदा सुयोग्यवरस्य प्राप्तिर्भवेत्, अथवा विवाहकालस्य अतिक्रमणं सम्भावितं स्यात्, अथवा देशे दुर्भिक्षजन्यं सङ्कटं स्यात् तदा सिंहस्थे गुरावपि विवाहः शुभकारक एव भवति। तद्यथा[12]-

**वरलाभातिकालाभ्यां दुर्भिक्षाद्देशविप्लवात्। विवाहः शुभदो नित्यं सिंहस्थेऽपि बृहस्पतौ।।** इति।।

एवं विवाहे उपर्युक्तानि सर्वाणि मतमतान्तराणि तथा देश-काल-परिस्थितीश्च परिचिन्त्य सावधानतया विवाहमुहूर्तस्य निर्णयः कर्तव्यः।

**2. मकरस्थगुरुविचारः**

यथा शास्त्रेषु सिंहस्थगुरोः प्राशस्त्यमथवा अप्राशस्त्यमुक्तं तथैव मकरस्थगुरुविषयकान्यपि प्राशस्त्याप्राशस्त्यजन्यानि वचनान्यवलोक्यन्तेशास्त्रेषु। किन्त्वत्रापि निर्णयक्रमे देश-काल-परिस्थिति-जन्यानि विभिन्नमतमतान्तराणि सम्यग्विलोक्य, सुविचिन्त्य सावधानतया निर्णयो विधेयः।

**(क) मकरस्थगुरोस्त्याज्यता**

दैवज्ञरामाचार्यस्य मते गुरोरस्तङ्गते यानि कार्याणि वर्जितान्युक्तानि तानि सर्वाणि कार्याणि सिंहस्थे वा मकरस्थे (नीचराशिस्थे) गुरौ त्याज्यानि कथितानि। तद्यथा[13]-

**अस्ते वर्ज्यं सिंहनक्रस्थजीवे वर्ज्यं केचिद् वक्रगे चातिचारे। गुर्वादित्ये विश्वघस्रेऽपि पक्षे प्रोचुस्तद्वद्दन्तरत्नादिभूषाम्।।**

**(ख) देशभेदेन मकरस्थगुरोः परिहारः**

पुना रामाचार्यो मकरस्थगुरोः परिहारं स्पष्टयँल्लिखति, यथा[14] **रेवापूर्वे गण्डकीपश्चिमे च शोणस्योदग् दक्षिणे नीच ईज्यः। वर्ज्यो नायं कौङ्कणे मागधे च गौणे सिन्धौ वर्जनीयाः शुभेषु।।** इति।।

अर्थात् रेवायाः (नर्मदायाः) पूर्वभागे तथा गण्डकीनद्याः पश्चिमभागे, शोणभद्राद्दक्षिणे उत्तरे च देशे नीचराशिगतो गुरुर्वर्जितो न भवति। स च नीच(मकर)राशिस्थो गुरुः कौंकण-मागध-गौड-सिन्धुदेशेषु वर्जितः।

क्षेत्रसंकेतः[15]-

रेवायाः (नर्मदायाः) पूर्वभागस्तथा गण्डकीनद्याः पश्चिमभाग इत्यनेन साम्प्रतिके समये इन्दौरतः पटनानगरपर्यन्तम् स्थितो भूभागोऽभिप्रेतोऽस्ति।

कौंकणदेशो दक्षिणभारतस्यैको भागविशेषोऽस्ति, यः खलु सम्प्रति कनारा, रत्नागिरिः, कोलाबा, मुम्बई, थाना इत्यादिनामभिःप्रसिद्धाः प्रदेशाः सन्ति। प्राचीनकाले केरलः, तुलवः, सौराष्ट्रः, कोंकणः, करहाटः, करनाटस्तथा वर्वरः एते सप्त प्रदेशाः कोंकणः कथ्यतेस्म।

मगधप्रदेशः उत्तरप्रदेशस्य तथा बिहारस्य भागविशेषोऽस्ति, यः खलु सम्प्रति काशीस्थगङ्गायाः पूर्वतटात् दक्षिणबिहारस्य प्राचीन-आरा-गयामण्डलपर्यन्तं व्याप्तोऽस्ति।

गौडदेशः साम्प्रतिको मध्यबङ्गालस्तथा उत्कलप्रदेशोऽस्ति। मध्यबंगाल एव प्राचीनकाले कीटकनाम्ना ज्ञायते स्म।

सिन्धुदेशेन अभिप्रेतोऽस्ति कच्छ-बहालपुर-वेलास्थानगतो भागो, य इदानीं मुम्बईनाम्ना प्रसिद्धोऽस्ति।

एवमेव पुरुषार्थचिन्तामणौ लिखति, यथा[16]-

**नर्मदापूर्वभागे तु शोणस्योत्तरदक्षिणे। गण्डक्याः पश्चिमे पारे मकरस्थो न दोषकृत्।।** इति।। अपि च[17]-

**मागधे सिन्धुदेशे च गौडदेशे च कोङ्कणे। नीचादिस्थो गुरुर्वर्ज्यो नान्यदेशे कदाचन।।** इति।।

अस्याशयोऽपि उपर्युक्तवचनानुकूल एवास्ति। किन्त्वधोलिखितवचने मकरस्थगुरोर्दोषः केवलं मगधदेशे एव उक्तः। यथा[18]-

**नीचस्थो वा गुरुर्वक्री वर्ज्यो वै मागधे जने । अन्यदेशे शुभं प्राहुर्वसिष्ठात्रिपराशराः।।** इति।।

**(ग) अंशभेदेन मकरस्थगुरोः परिहारः**

उपर्युक्तवचनेन तु मकरस्थो गुरुः समग्रतया त्याज्य इति प्रतीयते। किन्तु शास्त्रेषु एवमपि वचनानि प्राप्यन्ते यत्र मकरस्थगुरोर्भागविशेष एव त्याज्यः, न तु समग्रो मकरस्थो गुरुः। यथा19-

**वाक्पतौ मकरराशिमुपेते पाणिपीडनविधिर्न विधेयः। तत्र दूषणमुशन्ति मुनीन्द्राः केवलं परमनीचनवांशे।।** इति।।

अर्थात् मकरस्थे गुरौ यदा गुरुर्मकरराशेर्नवांशे (आदितः 3।20 अंशादियावत्) भवति तावदेव विवाहादिशुभं कर्म त्याज्यम्, न तु समग्रो मकरराशिगतो गुरुस्त्याज्यः।

किन्तु कानिचित्तु एवमपि वचनानि सन्ति यत्र मकरस्थगुरोर्नीचांश एव दोषावहः कथितः। यथा दैवज्ञो गोविन्दो मुहूर्तचिन्तामणेः पीयूषधाराटीकायां व्यवहारचण्डेश्वरस्य वचनमुद्धरति[20]-

**नीचराशिगतो जीवः प्रशस्तः सर्वकर्मसु । नीचांशकगतस्त्याज्यो यस्मादंशेषु नीचता।।** इति।।

अर्थात् गुरुर्यदा मकरराशौ भवति तदा परमनीचांश (पञ्चमः अंशः) एव त्याज्यः। अत्रायं भावो मकरराशेः पञ्चमे अंशे यावत्तिष्ठति गुरुस्तावदेव विवाहादिशुभकार्यं न विधेयम्, तदितरकालो न त्याज्य इति।

अत्राचार्यचण्डेश्वरस्यायमाशयः, यतो हि ग्रहस्य परमनीचांशे एव परमनीचता भवति, अतो यदा गुरुरपि मकरराशौ परमनीचांशे पञ्चमे अंशे स्यात् तदैव शुभकर्म त्याज्यमिति।

केनचित्तु मकस्थे गुरौ मकरारम्भकालात् षष्टिदिनानि यावत् शुभकर्मसु त्याज्यइत्युक्तम्।यथा[21]-

**मृगराशिगते जीवे दिनषष्टिं विवर्जयेत्।गर्गादिमुनिवाक्यत्वात् कर्तव्यं शुभमन्यतः।।** इति।।

यतो हि गुरोर्दैनिकी मध्यमा गति 5 कलाः सन्ति, अत एकांश (60 कला) भोगकालः 12 दिनानिभवन्ति। एतेन पञ्च अंशानां भोगकालः 60 दिनानि भवन्ति। मन्ये पञ्च अंशान् अभिलक्ष्यैव प्राच्यैः "दिनषष्टिं विवर्जयेत्"इत्युक्तम्।

टोडरानन्दमते तु गुरोर्मकरराशौ प्रवेशकालादेकमासपर्यन्तमेव वर्जितः काल उक्तः। यथा[22] -

**नीचस्थिते तु वागीशे मासमेकं विवर्जयेत्।। इति।।**

कश्चित्तु मकरस्थे गुरौ शुभकर्म त्याज्यमेव न हि। अर्थात् मकरस्थस्य गुरोर्नैव च कश्चन अंशः, नैव च कश्चन नवांशस्त्याज्यः, नैव च केषुचिद्देशविशेषु मकरस्थो गुरुस्त्याज्यः। यथा भीमपराक्रमस्य वचनं द्रष्टव्यमस्ति[23] -

**वापीकूपतडागादि निषिद्धं सिंहगे गुरौ ।मकरस्थे तु कर्तव्यं न दोषः काललोपजः।।** इति।।

एतेषामुपर्युक्तवचनानामवलोकनेन स्पष्टं ज्ञायते यदाचार्याणां मतेषु ऐक्यं नास्ति। किन्तु तत्र यदि मकरस्थो गुरुस्त्याज्यः कथितोऽपि तदा अधिकाधिकं द्वौ मासौ एव त्याज्यौ कथितौ।तदपि कदाचिद्देशविशेषेष्वेव। अतः प्रसङ्गेऽस्मिन् समग्रमपि मतमतान्तराणि परिशील्य देश-काल-व्यक्त्यनुरोधेन विवाहादिमुहूर्तानां निर्णयः सावधानतया विधेय इति दिक्।।

1.मुहूर्तचिन्तामणिः, 1/48 (पीयूषधारायाम्)
2.मुहूर्तचिन्तामणिः, 1/48 (प्रमितात्ररायाम्)
3.मुहूर्तचिन्तामणिः, 1/48 (प्रमितात्ररायाम्, पीयूषधारायाञ्च)
4.मुहूर्तचिन्तामणिः, 1/48 (प्रमितात्ररायाम्)
5.मुहूर्तचिन्तामणिः, 1/48 (प्रमितात्ररायाम्, पीयूषधारायाञ्च)
6.मुहूर्तचिन्तामणिः, 1/49 (प्रमितात्ररायाम्, पीयूषधारायाञ्च)
7मुहूर्तचिन्तामणिः, 1/49 (प्रमितात्ररायाम्, पीयूषधारायाञ्च)
8 मुहूर्तचिन्तामणिः, 1/49 (पीयूषधारायाञ्च)
9 समयशुद्धिविवेकः, पृ. 23
10 मुहूर्तचिन्तामणिः, 1/49
11 मुहूर्तचिन्तामणिः, 1/50-51
12. समयशुद्धिविवेकः, पृष्ठसं.-23
13 मुहूर्तचिन्तामणिः, 1/48 (पूर्वार्ध)
14 समयशुद्धिविवेकः, पृष्ठसं.-24
15 मुहूर्तचिन्तामणिः, 1/52 (मणिप्रदीपटीकायाम्)
16 मुहूर्तपारिजात, परिचयप्रकाण्ड, पृ. 62
17 समयशुद्धिविवेकः, पृ.24
18 समयशुद्धिविवेकः, पृ.24
19 समयशुद्धिविवेकः, पृ.24
20समयशुद्धिविवेकः, पृ.25
21 समयशुद्धिविवेकः, पृ.25
22 समयशुद्धिविवेकः, पृ.25
23 समयशुद्धिविवेकः, पृ.25

**आचार्यः, ज्योतिषविभागः राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः, भोपालम् (म.प्र.)**

# पुराणसाहित्यस्योपयोगिता

✍डा. दिलीप कुमार झा

पुराण शब्दस्य तात्पर्यमस्ति यत् पुराणं सदपि नवीनमस्ति। अर्थात् यत् शास्त्रं पुरातनघटनानां वर्णनं विदधानं सदपि वर्तमानां भविष्यन्तीं च घटनां वर्णयति तदस्ति पुराणम्, यच्च शास्त्रं केवलं प्राचीनानामेव घटनानां वर्णनं करोति सोऽस्ति इतिहासः।

एवमनेकस्थलेषु इतिहासपुराणशब्दौ सहैव पृथक् पृथग्वा प्रयुक्तौ स्तः। अत एव विद्वद्भिः एकं द्वितीयस्य पूरकमङ्गीकृतमस्ति। एवमितिहासपुराणशब्दौ कदाचन भिन्नभिन्नयोरर्थयोः प्रयुक्तौ स्तः। कदाचिदेकस्मिन्नेवार्थे प्रयुक्तौ स्तः। अतएव अमरकोषेऽमरसिंहेन यल्लक्षणमितिहासस्य कृतं तदेव लक्षणं नीलकण्ठेन महाभारतटीकायां पुराणस्य कृतं विद्यते। इतिहासः पुरावृत्तम्[1]पुराणं पुरावृत्तम्[2]।

याज्ञवल्क्यानुसारं तु इतिहासापेक्षया पुराणस्य क्षेत्रं विस्तृतं विद्यते। तेन याज्ञवल्क्यस्मृतौ चतुर्दशविद्यानां गणनाप्रसङ्गे[3] केवलं पुराणस्यैव गणना कृतास्ति नेतिहासस्यापि। किन्तु तत्र विद्वद्भिः पुराणमितिहासस्योपलक्षकम् इति मत्वा पुराणे इतिहासस्यान्तर्भावं विधाय तस्यापि विद्यात्वमङ्गीकृतम्। राजशेखर इतिहासं पुराणप्रभेदं मनुते।

वस्तुतः पुराणेषु धर्मदर्शनभक्तिकालेतिहासभूगोलराजनीतिसमाजव्यवस्था साहित्यादिविभिन्नविषयिकाः सामग्र्यः सङ्कलिताः सन्ति। येषां विवेचनं भारतीयेतिहासस्य नवनिर्माणेऽत्यन्तमुपादेयमस्ति। स्कन्दपुराणस्य रेवाखण्डे तु वेदविद्या पुराणं धर्मशास्त्रञ्चेति त्रयं सर्वशास्त्रविनिर्णये प्रमुखं स्वीकृतमस्ति पुराणञ्च पञ्चमो वेदः स्वीकृतोऽस्ति[4]।

**आत्मनो वेदविद्या च ईश्वरेण विनिर्मिता**
**शौनकीया च पौराणी धर्मशास्त्रात्मिका च या।**
**तिस्रो विद्या इमा मुख्याः सर्वशास्त्रविनिर्णये**
**पुराणः पञ्चमो वेद इति ब्रह्मानुशासनम्॥**

एकदा ब्रह्मविद्यामध्येतुं स्वसमीपे समुपस्थितं देवर्षिं नारदमुद्दिश्य भगवान् सनत्कुमारः पूर्वाधीतविद्याविषयं यदा जिज्ञासितवान् तदा तेन तदुत्तरे स्वाधीतविद्यासु पञ्चमवेदरूपस्य पुराणस्यापि चर्चा कृतास्ति। अतः पुराणानि भारतीयजीवनस्याधारं सांस्कृतिकस्येतिहासस्य च शृंखलां मत्वा तदध्ययं नितान्तमावश्यकम्।

पुराणवाङ्गमयं भारतीयजीवनसाहित्यस्यास्ति अमूल्यं रत्नं, तथाऽतीतं वर्तमानेन सह संयोजयितुं स्वर्णमयी शृंखला च । विश्वसाहित्यस्याक्षयभाण्डारेऽष्टादशपुराणानि अनुपमानि सर्वश्रेष्ठानि च रत्नानि सन्ति। इमानि चास्माकं सामाजिकसांस्कृतिकराजनीतिकधार्मिकदार्शनिकजीवनं स्वच्छदर्पणवत् प्रतिबिम्बितं कुर्वन्ति, सहैव सरलभाषया क्रमबद्धकथानकशैल्या च प्राचीनानि सन्त्यपि नवीनतां स्फूर्तिं च सञ्चारयन्ति।

धार्मिकपरम्परायां वेदान्तरमिति पुराणानामेव मान्यता वर्तते। पौराणिकज्ञानस्याभावे वैदिकसाहित्यस्यार्थावबोधः सर्वथाऽसम्भवो विद्यते। यथा इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्, समूढमकस्य पांसुरे[5] अस्य मन्त्रस्यार्थो न सायणादिभाष्यैरपि सम्यक् स्पष्टीभवति, यद् विष्णुना कदा कथं केन प्रकारेण वा विश्वमिदं त्रिभिः पदैः मापितं किन्तु पुराणेषु यदा बलिवामनकथया मन्त्रस्यास्य विवरणमुपलभ्यते तदा सन्देहस्य कश्चनावसरो न तिष्ठति। यथा वा नमो नीलग्रीवाय[6]इति मन्त्रस्यार्थो महीधरेण स्वभाष्ये कृतोऽस्ति यद् विषभक्षणान्नीलं जातं कण्ठः यस्य तस्मै शिवाय नमः इति।परन्तु अनेन भाष्यार्थेन न स्पष्टं ज्ञायते यच्छङ्करेण कदार कथं केन प्रकारेण विषभक्षणं कृतं, किन्तु पुराणेषु समुन्द्रमन्थन प्रसङ्गे अस्य समाधानं सम्पूर्णरूपेण जायते। अतः

पौराणिकसाहाय्यं विना वेदानां गूढार्थस्य समाधानं न सम्भवति। सूत्ररूपस्य वेदस्य भाष्यभूतं पुराणमर्थपरकं भूत्वा तदुपयोगित्वं नितरां वर्धयति।

श्रीजीवगोस्वामिना स्वकीये भागवतसन्दर्भे पुराणशब्दस्य व्युत्पत्तिरेका नवीनया दृष्ट्या कृता विद्यते। पुराणात् पुराणम्[7] अर्थात् यत् शास्त्रं वेदार्थं पूरयति तत् पुराणं प्रोच्यते। शास्त्रेषु श्रुतिः स्मृतिश्चेति द्वे नेत्रे प्रोक्ते स्तः तथा पुराणं हृदयं कथितमस्ति। तत्रैकेन चक्षुषा हीनो मनुष्यः काणः कथ्यते, द्वाभ्यां चक्षुभ्यां रहितोऽन्धः प्रोच्यते, परं पुराणशून्यो जनो हृदयहीनो निगद्यते। हृदयहीनात् मनुष्यात् क्वचित् काणोऽन्धश्च वरौ अभिमतौ स्तः –

उक्तञ्च- **श्रुतिस्मृति उभे नेत्रे पुराणं हृदयं स्मृतम्।**
**एकेन हीनः काणः स्याद् द्वाभ्यामन्धः प्रकीर्तितः॥**

रेवाखण्डे तु त्रिभिरेभिर्द्रष्टा माहेश्वरः प्रोक्तोऽस्ति-

**श्रुतिः स्मृतिश्च विप्राणां चक्षुषी परिकीर्तिते।**
**काणस्तत्रैकया हीनो द्वाभ्यामन्धः प्रकीर्तितः॥**
**श्रुतिस्मृतिपुराणानि विदुषां लोचनत्रयम्।**
**यस्त्रिभिर्नयनैः पश्येत् सोंऽशो माहेश्वरो मतः**[8]**॥**

भारतीयसंस्कृतेः सभ्यतायाश्च व्यापकेतिहासाय पौराणिकसाहित्यस्य महती उपयोगिता वर्तते। यतो हि पौराणिके वाङ्मये भूतत्त्वभूगोलखगोलराजनीतिकलाविज्ञानदर्शनतत्त्वज्ञानसम्बन्धिधर्मार्थादीनां लोकोपयोगिनां शास्त्रीयविषयाणाञ्च साङ्गोपाङ्गविवरणमुपलभ्यते।

पुराणेषु योगबलेन त्रिकालदर्शिना महर्षिणा वेदव्यासेन आदर्शमानवचरित्रचित्रणं, सर्वधर्मरहस्यकीर्तनं, वर्णाश्रमव्यवस्थाप्रतिपादनं, सर्वदर्शनरहस्यसमर्थनं, कर्तव्यपथप्रदर्शनं, असत्पथनिवृत्तिमार्गसूचनं, ज्ञानस्य भक्तेः कर्मणश्च निरूपणम्, अवतारस्य विवेचनं च महता कौशलेन कृतमस्ति। पुराणानि भारतीयसंस्कृतेः हृदयमेवेति कथने नास्ति कश्चिदपि अतिशयोक्तिलेशः। अतो हिन्दुजातौ प्राणवत्प्रियस्य सर्वाभ्यर्हितस्य, वेदवदादरणीयस्य, सर्वैः धार्मिक शिरोमणिभिः सर्वथा समादृतस्य सम्प्रदायविरोधेन सर्वदर्शनसिद्धान्तसर्वोपासनरहस्यसमर्थनशीलपरस्यालौकिकभावगुम्फितस्य भगवत आज्ञास्वरूपस्य पुराणसमूहस्याध्ययनमवश्यं कर्तव्यमेव-

उक्तञ्च- **पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम्।**
**आज्ञासिद्धानि सर्वाणि न हन्तव्यानि हेतुभिः॥**[9]

पुराणानां भाषा प्रसादगुणगुम्फिता भावमयी अतिसरला मञ्जुला च वर्तते। येनाल्पज्ञा स्वल्पप्रयासेनैव तदध्ययनतः पुराणमर्मज्ञा भवितुमर्हन्ति, राष्ट्रधर्मस्य समुन्नतिं कर्तुं प्रभवन्ति, मानवजन्मनः प्रधानलक्ष्यभूतां भगवत्प्राप्तिञ्च कर्तुं शक्नुवन्ति।

पुरति अग्रे गच्छतीति पुरा। तुदादिगणपठितात् पुर अग्रगमने इति धातोः औणादिके का प्रत्यये कृते पुरा शब्दो निष्पद्यते,। कोशानुसारं च स त्रिषु अर्थेषु प्रयुज्यते- प्रबन्धे, अतीतकाले संकटे च। तथा हि –

**स्यात् प्रबन्धे पुरातीते संकटागमिके तथा।**[10]

**मत्स्यपुराणानुसारम्- पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः।**[11]

वायुपुराणमपि प्राचीनकालतोऽद्यावधिं जीवितं साहित्यमेव पुराणं मनुते-

**यस्मात् पुरा ह्यनक्तीदं पुराणं तेन कथ्यते।**
**निरुक्तमस्य यो वेद सर्व पापैः प्रमुच्यते॥**[12]

पद्मपुराणानुसारं प्राचीनां परम्परां व्यक्तीकर्तुं समर्थं शास्त्रमेव पुराणमुच्यते-

**पुरा परम्परा व्यक्ति पुराणं तेन वैः स्मृतम्।**[13]

ब्रह्माण्डपुराणानुसारम्-

**यस्मात् पुरा ह्यभूश्चैतत् पुराणं तेन तत् स्मृतम्।**[14]

पञ्चविषयाः प्रधानतया यस्मिन् ग्रन्थे विवेचिताः सन्ति तत् पुराणमुच्यते-

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चेति पुराणं पञ्चलक्षणम्॥**

अत्र सर्गो नाम सृष्टिः- जगदुत्पत्तिः। परिसर्गो नाम दृश्यमानस्य समस्तस्य प्रपञ्चस्य प्रलयः। वंशो विश्वस्योपादानभूतानां तत्त्वानां देवर्षिमनुष्याणां चोत्पत्तिपरम्परा। मन्वन्तरं नाम सृष्ट्यादीनां कालव्यवस्थापनम्। वंशानुचरित च तत्तत्वंशभवानां मनुष्याणां राजर्षीणां महर्षीणां च विषये यद् वक्तव्यं तद्विवरणोपस्थापनम्। पौराणिकीं कथामाश्रित्यैव कालिदासादयो बहवो महाकवयोऽप्यनेकानि महाकाव्यानि नाटकादीनि च विरचय्यात्मनो धन्यान् मन्यन्ते। एवञ्च पुराणेभ्यो महानुपकारो भवति संस्कृतसाहित्यस्य। यतस्य उत्तरोत्तरं वर्धते गौरवं पुराणसाहित्यस्य।

## सन्दर्भ संकेताः –

1.अमरकोषः ०१/०५
2.अमरकोषः ०१/०५/०१
3.याज्ञवल्क्यस्मृतिः ०१/०३
4.स्कन्दपुराणस्य रेवाखण्डतः
5.ऋग्वेदे ०१/०५/२२/१७
6.यजुर्वेदे १६/२८
7.भागवतसन्दर्भः पृ. १७
8.स्कन्दपुराणस्य रेवाखण्डे ०/१५/१६
9.म. भा. अनु. प. ७/३५
10.मे. को. १५
11.मत्स्यपुराणम् ०५/०३/७२
12.वायुपुराणम् ०१/२०३
13.पद्मपुराणम् ०१/०२/५४
14.ब्रह्माण्डपुराणम् ०१/०१/१७३

**विभागाध्यक्ष-धर्मशास्त्र विभाग कामेश्वर सिंह संस्कृत विश्वविद्यालय, दरभंगा।**

# वैदिकशिक्षायाः समालोचनात्मकविश्लेषणं वर्तमानशिक्षायां तस्याः प्रासङ्गिकता च

**Critical Analysis of Vedic Education & Its Relevance to Present Education**

✍ *Dr. V S V Bhaskar Reddy*

भारते शिक्षायाः बीजारोपणं प्रायः ख्रीष्टाब्देः पूर्वं 2500 BC वर्षैव जातमासीत्। परन्तु तस्याः सुसम्बद्ध-दर्शनं विचाराः व्यवस्था नियमा आरम्भप्रक्रिया समापनप्रक्रियादयः वैदिककालैव समारब्धा आसन्। सामान्यतया वैदिककाले प्रदत्ता शिक्षा, वैदिककालीन-विचाराणां सम्प्रत्ययादीनामनुसारं प्रदत्ता च शिक्षा वैदिकशिक्षेति व्यवह्रियते। वैदिककालीन शिक्षाव्यवस्थायां अग्रिमवर्णीयानां विशिष्य पुरोहितानां ब्राह्मणानां वा सर्वाऽऽधिपत्यम् एकमात्राऽऽधिपत्यं वाऽऽसीत्। वैदिककाले सञ्जनितानां महत्वपूर्णपरिवर्तनानामाधारेण वैदिकशिक्षा चरणद्वये भागद्वये वा विभक्ता वर्तत इतिहासकारैः। ते च यथा - 1. ऋग्वेदकालीनशिक्षा 2. उत्तरवैदिककालीनशिक्षा चेति। अत्र पूर्वस्याः कालाऽऽवधिः 1500 BC/BCE तः 1000 BC/BCE पर्यन्तं भवति, अपरस्याः कालाऽऽवधिः 1000 BC/BCE तः 600 BC/BCE पर्यन्तं भवति।

वर्तमानशिक्षाव्यवस्थायाञ्च अवश्यमनुप्रयोगणीयाः बहवः विषयाः विचाराः सम्प्रत्ययाः वैदिककालीनशिक्षाव्यवस्थायां दृश्यन्ते। एवमेव परिहरणीयाः केचन विषयाः विचाराः सम्प्रत्ययाः अवगुणाश्च दृश्यन्ते। 'सन्तः परीक्ष्यान्यतरं भजन्ते मूढः परप्रत्ययनेयबुद्धिरि'ति कालिदासस्य वचनानुसारं युक्तियुक्ततया विवेचनात्परं गुणानां स्वीकारः, दोषाणाम् अवगुणानां वा तिरस्कारो परित्यागो वा विवेकशीलिनां लक्षणं भवति। वैदिककालीनशिक्षाव्यवस्थायां परिदृष्टानां गुणानाम् अवगुणानाञ्च विवेचनं युक्तियुक्ततया अधोप्रस्तूयते।

**I. वैदिकशिक्षायाः गुणाः -** वर्तमानकालीनशिक्षाव्यवस्थायाञ्च सर्वदा अनुप्रयोगणीयाः शिरोदार्ढ्याः केचन सम्प्रत्ययाः विचाराः वैदिकशिक्षायां दृश्यन्ते। वर्तमानतकालीनशिक्षा-व्यवस्थायां तेषां सम्प्रत्ययादीनां क्रियान्वयनेन सर्वजनहिताय सर्वजनसुखाय च कारणं भजते, उत्तमोत्तमभारतीयसमाजस्य निर्माणम् अंशिकतया कर्तुं शक्यत इत्यत्र नास्ति लेशमात्रमपि सन्देहः। ते च गुणाः यथा—

1. **निःशुल्कशिक्षा (Free Education) -** ऋग्वेदकाले उत्तरवैदिककाले च गुरुकुलादिषु छात्रेभ्यो निःशुल्कतया शिक्षा प्रदीयते स्म। विद्यार्जनाय छात्रेभ्यो लेशमात्रं नाममात्रं वा शुल्कं नैव स्वीक्रियते स्म, प्रत्युत भोजन-आवासादि सौविध्यानि निःशुल्कतया प्रकल्प्यन्ते स्म। तदानींतनकाले विद्यार्जनमेव भवति स्म, न तु विद्याक्रयः। वर्तमानकालीनशिक्षाव्यवस्थायां बहुत्र विद्याक्रयो जायमानो वर्तते, न तु विद्यार्जनं भवति। अनेन सम्पन्नानामेव विद्यार्जनाय शैक्षिकावसराः समुपलभ्यन्ते, ते एव जीवने अग्रिमपथं प्राप्तुं योग्याः जायन्ते।

2. **आवासीय /आश्रमविद्यालयाः (Residential Schools) -** ऋग्वेदकाले उत्तरवैदिककाले च गुरुकुलादिषु विद्यार्जनाय प्रविष्टाः छात्राः न केवलं ज्ञानार्जनमेव कुर्वन्ति स्म, अपि च गुरुकुलादिषु गुरुणा सह, गुरोः परिवारेण सह सहपाठिभिस्सह सहजीवनं करणीयं भवति। अर्थात् गुरुशिष्याणां प्रत्यक्षसम्बन्धाः न केवलं अध्यापनं कालं यावदेव सीमितं न भवन्ति, अपि च अहर्निशं(24*7) भवन्ति। अनेन प्रत्येकं दिने यातायाताय जायमानस्य समयव्यर्थतात्मुक्तिः जायते, सक्रियात्मकाधिगमस्योपरि सकारात्मकप्रभावश्च दृश्यते।

3. **उत्तमोत्तमजीवनाभ्यासानां विकासः (Development of Good habits)-** गुरुकुलादिषु निर्दिष्टानाम् आनुशासनिकनियमानां पालनं कुर्वन्नेव विद्यार्जनं करणीयं भवति स्म । यथा - ब्रह्ममूर्ते जागरणं उत्थानं वा, ज्येष्टानां प्रति विधेयता, ज्येष्टानां वाक् पालनं, गुरुमातरं प्रति गुरुपरिवारं प्रति च विधेयता, स्वास्थ्यस्य शुद्धतायाः स्वच्छतायाश्च पालनं, प्रकृतिं प्रति पूज्यभावः, नैव कस्यचिदपि निन्दा अपमानं वा, न वा द्वेषशीलता न च क्रोधशीलता, परस्पर-सहयोगः, सामूहिकजीवनमित्यादयः । फलतः छात्राणां व्यवहारे उत्तमोत्तजीवनाभ्यासानां विकासो जायते ।

4. **सामाजिकगुणानां विकासः (Social development) -** अध्ययनकाले सर्वे छात्राः गुरुकुलेषु सहपाठिभिस्सह सामूहिकजीवनं करणीयं भवति । अनेन अन्येषां छात्राणां व्यवहारे दृश्यमानानां उत्तमोत्तमाभ्यासादीनाञ्च स्वीकरणाय चावसराः समुपलभ्यन्ते

ISSN – 2349-3100

स्म। छात्राणां व्यवहारे सहयोगभाव-सहनशीलता-व्यवहारशीलतादि सामाजिकगुणानां सुविकासो जायते, अन्यैः छात्रैस्सह समायोजने सामञ्जस्यसम्पादने च कुशलतां प्राप्नुवन्ति, फलतः व्यवहारो गतिशीलको भविष्यति, समाजे राष्ट्रे च उत्तमोत्तमनागरिको भवितुमर्हति च । वर्तमानकालीनशिक्षाव्यवस्थायां दृश्यमानस्य छात्रव्याकुलतायाः असन्तोषस्य वा दूरीकरणे अयमत्यन्तमहत्वपूर्णो भवति।

5. **गुरु-शिष्ययोः मध्ये आदर्शसम्बन्धाः (Ideal Relations between Teacher & Student) -** वैदिककालीनशिक्षाव्यवस्थायां दृश्यमानाः गुरुशिष्यसम्बन्धा उत्तमोत्तमाः, सम्पूर्णविश्वे अस्तित्वे प्रचलने वा विद्यमानशिक्षाव्यवस्थानाम् आदर्शाश्चासन् । तदानींतनकाले गुरु-शिष्ययोः मध्ये प्रत्यक्षसम्बन्धाः, अविनाभावाः अन्योन्याश्रिताश्च सम्बन्धाश्चासन् । गुरुकुलव्यवस्था गुरुशिष्ययोर्मध्ये अवरोधकी न भवति स्म, यतः गुरुवः शिष्याश्च गुरुकुलादिषु वसन्ति स्म। । वैदिककालीन आदर्शसम्बन्धा इति सम्प्रत्ययोयं क्रियान्वितश्चेत् उत्तमोत्तमभारतीयसमाजस्य निर्माणं सुसाध्यञ्च शीघ्रमेव सम्भवं भवति ।

6. **वैय्यक्तिकप्रशिक्षणम् (Individual Instruction) -** वैदिककालीन शिक्षाव्यवस्थायाम् अध्यापनं छात्राणां वैय्यक्तिकं बौद्धिकञ्च क्षमतानुसारमेव क्रियते स्म । सामूहिकशिक्षणेन 100 % छात्राः कदापि नैव लाभान्विताः भवन्तीति जगद्विदितसत्यं भवति, यतः सर्वेषां छात्राणां वैय्यक्तिकी बौद्धिकी च क्षमता प्रायः कदापि नैव भवितुमर्हन्ति। छात्राणां वैय्यक्तिक-बौद्धिकक्षमतादयः भिन्नाः विषमाश्च भवन्त्येव। केषाञ्चन छात्राणां बौद्धकस्तर उत्कृष्ट, अन्येषां मध्यमः, अपरेषां निम्नतमश्च भवति। छात्राणां वैय्यक्तिकाः बौद्धिकाश्च क्षमतासु विषमता अस्ति चेदपि केवलं वैय्यक्तिकप्रशिक्षणेनैव, न तु सामूहिकशिक्षणेन सर्वे छात्राः लाभान्विताः भवन्तीति मनोविज्ञानिनां मतम् ।

7. **धार्मिकजीवनम् (Religious Life) -** वैदिककाले सांसारिकबन्धनेभ्यो मुक्तये व्रत-यज्ञ-उपासना-धार्मिकोत्सवानां माध्यमेन छात्रेषु धार्मिकभावनायाः जागरणं क्रियते स्म । सम्पूर्णं ब्रह्माण्डमिदम् ईश्वरेण व्याप्तमित्यस्य धार्मिकभावनायाः विकाससम्पादनं क्रियते स्म। अन्तेवासिनां व्यवहारे धृति-क्षमा-दम-अस्तेय-शौच-इन्द्रियनिग्रह-धी-विद्या-सत्य-अक्रोध इति दशलक्षणैस्सह समन्विताचरणस्य विकासो सम्पाद्यते स्म। मानवानां मूलप्रवृत्तौ प्रच्छन्नतया विद्यामानस्य पशुप्रवृत्तेः संस्करणं, तत्स्थाने मानवीय-सामाजिक-सत्यनिष्ठादि मूल्यानां विकासश्च केवलं धार्मिकमूल्यानां विकासेनैव जायत इति जगद्विदितसत्यं भवति। जीवने सर्वजनहिताय सर्वजनसुखाय समाजहिताय कल्याणाय च ऋषिभिः ज्येष्टैर्वा निर्दिष्टं निर्धारितं वा सामाजिकजीवनं यापनीयं भवति। लोकतान्त्रिकभारते गुणोयं सर्वदा स्वागतार्ह एव भवति।

8 **सरलजीवनम् उच्चविचाराश्च (Simple life & High level thinking) -** वैदिककाले गुरुकुलादिषु अध्ययनकाले अन्तेवासिनः निराडम्बरम् अतीवसामान्यञ्च जीवनं यापनीयं भवति। सुन्धद्रव्यानां लेपनानाञ्च प्रयोगे, अश्व-रथादि वाहनानाम् अनुप्रयोगे, सुवर्ण-रजत-वज्रादि बहुमूल्याभूषणानां प्रयोगे, अतिमूल्यवस्त्राणाञ्च धारणे, अतिमात्रायां भोजननिर्माणे संग्रहणे उपभोगे वा, न्यूनातिरीत्या पादरक्षयोः प्रयोगे च प्रतिषेधाः भवन्ति स्म। अन्तेवासिनः सर्वे आत्मसंयमो नियन्त्रितो च भूत्वा निर्दिष्टानुष्ठाणानां निर्वहणं नियमितदिनचर्यानुसारं नियमितकाले विधीयन्ते स्म। तत्र लेशमात्रमपि अलसत्वाय अतिक्रमणाय उल्लङ्गणाय वा नैव प्रयतन्ते स्म। दुर्व्यसनादिभिः प्रभाविताश्च न भवन्ति स्म। जीवनाय अपेक्षितानां न्यूनातिन्यूनतमानां संसाधनानामेव प्रयोगः करणीयो भवति।

9. **आध्यात्मिकगुणानां विकासः (Spiritual development) -**वैदिकोत्तरकाले सृष्टेः रहस्यमयतत्वानाम् आध्यात्मकिविषयाणां विकासः भारते एव जात इति कथने लेशमात्रमपि अतिशयोक्तिः नास्तीति जगद्विदितसत्यं भवति। वैदिककालीन पाठ्यचर्यायाम् आध्यात्मकिविषयाणां तथ्यानां वा महत्वपूर्णं स्थानं प्रयच्छन्ति स्म। तासां गुणानां विकाससम्पादनं प्रत्येकं मानवस्य जीवनोद्देश्यमिति मन्यन्ते स्म। आध्यात्मकिगुणानां विकासेन परिपूर्ण-मानवस्य निर्माणं साध्यं भवति। लोकतान्त्रिकभारते गुणोयमपि सर्वदा स्वागतार्ह एव भवति, यत अनेनैव उग्रवाद-चरमवादेभ्यो मुक्तिः जायते।

10. **परिपूर्ण-व्यक्तित्वस्य विकासः (Core development of Personality) -**वैदिकशिक्षया बालकानां शारीरिक-मानसिक-बौद्धिक-सामाजिक-सांस्कृतिक-नैतिक-चारित्र्यक-धार्मिक-संरचनात्मक-आध्यात्मिकादि गुणानां विकासो सम्पाद्यते स्म। शिक्षायाः माध्यमेन अन्तेवासिनां व्यवहारे विवेकशक्तेः उदयः, आत्मसंयम-आत्मसम्मान-आत्मविश्वासादि सद्गुणानां विकासो

 ISSN – 2349-3100

क्रियते स्म। विद्वद्गोष्ठीनां सभानां वादविवादप्रतियोगितानाम् आयोजनेन अन्तेवासिनां व्यवहारे विवेकस्य न्यायस्य तार्किकतायाः निष्पाक्षिकतायाश्च विकासो सम्पाद्यते स्म। गुरुकुलादिषु अध्ययनवेलायां सहवासेन सहभोजनेन सहाध्ययनेन च अन्तेवासिनां व्यवहारे सामञ्जस्य क्षमतायाः विकासो जायते स्म, फलतः तेषां जीवने गतिशीलतायाः विकासो जायते स्म। अनेन छात्राणां जीवने सम्पूर्ण-व्यक्तित्वविकासाय सकारात्मकप्रवृत्ते आशावादस्य गतिशीलतायाश्च विकासो जायते।

**11. चारित्र्यक-नैतिकगुणानां विकासः (Characteristic & Moral development) -**वैदिकशिक्षया भौतिकजगदिदम् अशाश्वतमिति भावनायाः जागरणं क्रियते। धरातलेस्मिन् मानवानां व्यवहारः आदर्शात्मको भवेदिति उपदिशति स्म वैदिकशिक्षा। उक्तञ्च - ईशावास्यमिदं सर्व यत्किञ्च जगत्यां जगत् . . . .। रामादिवत् व्यवहर्तव्यं न रावणादिवत् इति चारित्र्यकं व्यावहारिकञ्च गुणानां विकासः शिक्षया सम्पाद्यते स्म।

**12. गुरुदक्षिणाप्रथा (Donation System) -**वैदिककाले शिक्षायाः प्रक्रियायाः समापने काले समावर्तनसमारोहस्यायोजनं क्रियते स्म। छात्राः स्वीय वित्तीयक्षमता-सामर्थ्यानाञ्चानुसारं गरवे गुरुदक्षिणां समर्पयन्ति स्म। अत्र कोपि निर्बन्धो नासीत्। गुरुदक्षिणासमर्पणं नाम कृतज्ञताज्ञापनं भवति। अर्थात् जीवने उपकारेभ्यो अनिर्बन्धतया कृतज्ञतासमर्पणमनिवार्यम् अवश्यमति भावनायाः जागरणे प्रथेयं महदुपकरोति। वर्तमानकाले शिक्षासंस्थानस्य विकासार्थं छात्राणां क्षमतानुसारम् ऐच्छिकरीत्या दानम् उपदानं वा स्वीकर्तुं शक्यत एव, परन्तु निर्बन्धो न भवेत्।।

**13. शिक्षासंस्थानानि बाह्यनियन्त्रणात्मुक्तानि (Free from external forces) -**वैदिककाले शिक्षासंस्थानानि (गुरुकुल-आश्रमादीनि) कस्यचिदपि राज्यस्य राज्ञः तस्य अधीनस्थाधिकारिणश्च नियन्त्रणे अधीने वा नैव सञ्चाल्यन्ते स्म। शिक्षासंस्थानानि स्वीय आभ्यन्तरव्यवहारेषु बाह्यव्यवहारेषु स्वायत्तानि भवन्ति स्म, शिक्षासंस्थानीय व्यवहारेषु हस्तक्षेपणाय कस्यचिदपि अधिकारो न भवति स्म। अर्थात् शिक्षासंस्थानानि राज्य-राजादि बाह्यनियन्त्रणात्मुक्तानि भवन्ति स्म। शिक्षासंस्थानाय वित्तसहायताप्रदानं (भूदानं गोदानं अन्यत् यत्किमपि वा) राज्यं करोति स्म। वर्तमानकालीनशिक्षायां प्रत्येकं पदे सर्वकारस्य राजनीतिज्ञां हस्तक्षेपेण विद्यालयाः कुरुक्षेत्रत्वेन राजनैतिकपुनरावासकेन्द्रेत्वेन च अपरिणमत-स्थितौ शिक्षासंस्थानानां स्वायत्तता प्रदानम् उत्तमोत्तमं भवति।

**14. प्रशान्तवातावरणे शिक्षासंथानानां संस्थापनं सञ्चालनञ्च (Schools at Silence zones) -** वैदिककाले अस्तित्वे विद्यमानानि शिक्षासंस्थानानि (गुरुकुल-आश्रमादीनि) ग्रामात् नगरात् वा दूरे, विविधप्रकारकप्रदूषणेभ्यो मुक्तक्षेत्रैव संस्थापयन्ते स्म। अनेन शैक्षिकगतिविधीनां सञ्चालने नकारात्मकप्रभावं नैव दर्शयन्ति स्म। अध्यापनाय अध्ययनाय च सौविध्यमयं जायते स्म। गुरुशिष्याणाम् मध्ये जायमाना अन्तःक्रियाः (अध्यापनाध्ययनक्रियाः) नैव कुप्रभाविताः भवन्ति स्म। वर्तमाने काले सञ्कुचितस्थाने विद्यालयाः संस्थाप्यमानाः वर्तन्ते, अनया शिक्षण-अध्ययनप्रक्रियया उपरि नकारात्मकप्रभावो जायते। शिक्षाया उद्देश्यसम्पादनं प्रायः नैव सम्भवं भवति। अतः वर्तमाने वैदिकसम्प्रत्ययोयमवश्यमनुपालनीयो भवति।

**II. वैदिकशिक्षायाः दोषाः अवगुणाः वा**

वर्तमानशिक्षाव्यवस्थायां कदापि स्वप्नेपि नैवानुप्रयोगणीयाः केचन सम्प्रत्ययाः विचाराः नियमाः वैदिकशिक्षायाः दृश्यन्ते। वर्तमानशिक्षाव्यवस्थायां एतेषां सम्प्रत्ययादीनां क्रियान्वयनेन उत्तमोत्तमभारतीयसमाजस्य भेदभावरहितसमाजस्य समताभारतस्य च निर्माणं स्वप्नेपि असम्भवं भवति। ते च अवगुणाः यथा -

**1. शिक्षा पैतृकी वैय्यक्तिकी वा सम्पत्तिः (Individual & Paternal Asset) -** ऋग्वेदकाले शिक्षा सर्वेषां भारतीयानां सामूहिकी सार्वजनिकी च सम्पत्तिरिति मन्यते स्म। तदानींतनकाले समता-स्वतन्त्रता-समन्याय-समावसरादि ईश्वरप्रसादिता अधिकाराः सर्वेषामिति मत्वा अनिवार्यशिक्षायाः प्रसारः क्रियते स्म। परन्तु वैदिकोत्तरकाले शिक्षाव्यवस्थायाम् अग्रिमवर्णीयानां विशिष्य पुरोहितानां एकमात्राधिकारः केषुचित् सर्वाधिपत्यञ्चासीत्। ब्राह्मण बिल बिलयिले बेद (ब्राह्मणैः यः प्रलपितः सो वेदः) इति ओडियाभाषाया आभाणकानुसारं तैः निर्दिष्टः नियम एव आत्यन्तिको भवति जीवनस्थ प्रत्येकं पदे, शैक्षिकावसराणां प्रकल्पने प्रतिषेधे च।

**2. वर्णाधारेण भेदभावाः (Discriminations based on Varna System)-**ऋग्वेदकालीनशिक्षाव्यवस्थायां उपनयनसंस्कारस्यायोजने विद्यार्जनाय च केपि भेदभावाः प्रचलने नासन्। सर्वं समतासिद्धान्तानुसारं प्रकल्प्यन्ते स्म। परन्तु वैदिकोत्तरकाले विद्यार्जनाय निर्दिष्टस्योपनयनसंस्कारस्यायोजने विद्यालयप्रवेशे च जनानां वर्णाधारेण त्रयः भेदभावा आसन्।

यथा—जनानाम् आयुः, कालः पाठ्यचर्या चेति। अर्थात् जनानां वर्णाधारेण प्रवेशवयसि, प्रवेशकाले अध्ययनीयपाठ्यचर्यायान्च भेदभावाः कुसमागता इति। गुरुकुले प्रवेशाय ब्राह्मण-क्षत्रिय-वैश्यबालकानां निर्धारितायुः समाना नासीत्। अष्टमे वर्षे ब्राह्मणानां, एकादशे वर्षे क्षत्रियानां, द्वादशे वर्षे वैश्यनां प्रवेशाः प्रदीयन्ते स्म। गुरुकुले प्रवेशाय ब्राह्मण-क्षत्रिय-वैश्यबालकानां निर्धारिता ऋतुरपि समाना नासीत्। वसन्ते ब्राह्मणानां, ग्रीष्मे क्षत्रियानां, शरदृतौ वैश्यनां प्रवेशाः प्रदीयन्ते स्म।

**3. वर्ण-लिङ्गयोराधारेण प्रतिषेधाः (Prohibitions based on Varna & Gender)-** ऋग्वेदकाले विद्यार्जनाय निर्दिष्टस्य उपनयनसंस्कारस्यायोजने केपि प्रतिषेधाः प्रचलने नासन्। परन्तु वैदिकोत्तरकाले विद्यार्जनाय निर्दिष्टस्य उपनयनसंस्कारस्यायोजने जनानां वर्णाधारेण लिङ्गाधारेण च भेदभावाः प्रतिषेधाश्च परिकल्पिता आसन्। स्मृतिग्रन्थादीनां प्रभावेन शूद्राणां सर्ववर्णीयमहिलानाञ्च विद्यार्जनाय निर्दिष्टस्य उपनयनसंस्कारस्यायोजने प्रतिषेधाः कुसमागता आसन्। शूद्र-पञ्चमवर्णीय-महिलानां न वा शैक्षिकावसराः, न च शैक्षिकाधिकाराः सुनिश्चता आसन्। केवलम् अग्रमिवर्णीयानामेव शैक्षिकाधिकाराः अवसराश्च परिकल्पिता आसन्।

**4. शैक्षिकावसरप्रकल्पने भेदभावाः, निरक्षरभारताय शिलान्यासश्च -**वैदिककाले पुरुषार्थचतुष्टयसम्पादनं प्रत्येकं मानवस्य जीवने मुख्योद्देश्यमति एकत्र उद्बोधयन्नेव मोक्षसाधनभूतायाः शिक्षायाः प्राप्तये निर्दिष्टस्य उपनयनसंस्कारस्यायोजने उत्तरवैदिककाले शूद्राणां सर्ववर्णीयमहिलानाञ्च भेदभावाः प्रतिषेधाश्च परिकल्पिता आसन्। महिलानां शूद्राणाञ्च उपनयनसंस्कारस्यायोजनं नैव क्रियन्ते स्म। बहुसंख्याकानां शूद्राणां, 50% महिलानाञ्च शैक्षिकावसराः नैव प्रकल्पिता इति सुस्पष्टतया ज्ञायते। ते ताश्च जनाः अध्ययनाय अयोग्याः सञ्जाताः। फलतः बहुसंख्याकाः जनाः निरक्षराः

**5. शिक्षाव्यवस्थायाम् अत्याचाराः-**शैक्षिकावसराणां प्रकल्पने ऋग्वेदकालो स्वर्णिमयुगो भवति,परन्तु उत्तरवैदिककालस्तु अन्धकारयुगो भवति। यतः उत्तरवैदिककाले शूद्राणां पञ्चमवर्णीयाणां सर्ववर्णीयमहिलानाञ्च शैक्षिकावसराः अधिकाराश्च प्रतिषिद्धा आसन्। यदि प्रतिषिद्धाः जनाः विद्यार्जनाय (परोक्षतया च) प्रयासाः विधीयन्ते चेत् अमानवरीत्या राक्षसात्मकतया च अत्याचाराः क्रियन्ते। यथा - जिह्वाकर्तनं, कर्णे सीसपदार्थस्य स्थापनम्, अभिशापीकरणमित्यादयः। अत्याचारक्षेत्रे पुरस्कारप्रदानाय अवसराः सन्ति चेत् उत्तरवैदिककालीन-अग्रिमवर्णीयानाम् अवश्यं नोबेल-पुरस्कारः (Noble Prize) मिलति इति कथने नास्ति लेशमात्रमपि अतिशयोक्तिः, अर्थात् तावन्मात्रायाम् अत्याचाराः कृता इत्यर्थः।

**6. समाजे अस्पृश्तायाः कविकासः-**उत्तरवैदिककाले शिक्षाव्यवस्थायां कुसमागतानां भेदभावानां प्रतिषेधानाम् अत्याचारादीनां कारणेन समाजस्थ बहुसंख्याकाः शूद्राः पञ्चमवर्णीयाश्च पशूनामपेक्षया हीनतया जीवनयापनं कुर्वन्ति स्म। समाजे केवलम् अग्रिमवर्णीयानां (ब्राह्मण-क्षत्रिय-वैश्यानां) सम्माननीयस्थानं विद्यार्जनाय अवसराः अधिकारा आसन्। शूद्राः पञ्चमवर्णीयाश्च अर्थात् भारतीयसमाजे अस्पृश्तायाः सृजनस्य कुश्रेयो उत्तरवैदिककालीन-अग्रिमवर्णीयानामेव भवतीति सुस्पष्टम्।

**7. जीविकोपार्जने अक्षमता-**ऋग्वेदकालीनशिक्षायाः पाठ्यचर्यायां भौतिक-आध्यात्मिकयोः विषययोश्च प्राधान्यं प्रदीयन्ते स्म, यत्र उत्तरवैदिककालीनशिक्षायाः पाठ्यचर्यायां केवलम् आध्यात्मकपक्षस्योपरि प्राधान्यं प्रदीयते स्म। केवलम् आध्यात्मिकगुणानां विकासाय प्रयासाः विधीयन्ते स्म। भौतिकजगति सक्षमतया जीवनयापनाय भौतिकविषयाणाञ्च प्राधान्यमनिवार्यं भवति। यस्याभावेन विद्यार्जनात्परम् आजीविकासम्पादनं कष्टतमं भवति।

**8. अध्यापककेन्द्रिता शिक्षा-**वैदिककाले प्रदीयमाना शिक्षा अध्यापककेन्द्रिता आसीत्। यत्र अन्तेवासिनां बौद्धिकक्षमता-आवश्यकता-आकांक्षा-रुचि-सौविध्यानुसारं शिक्षा नैव प्रदीयते स्म। अध्यापकस्य बौद्धिकस्तर-समयसौविध्यादीनामनुसारमेव शिक्षा प्रदीयते स्म। अर्थात् अध्यापकः शिक्षाप्रक्रियायाः केन्द्रबिन्दुरासीत्, न तु छात्रः। यः सम्प्रत्ययः वर्तमानकालीनसम्प्रत्ययात् विरुद्ध अमनोवैज्ञानकश्चासीत्।

**9. अध्यापनमाध्यमा नैव जनसामान्या-**वैदिककाले संस्कृतभाषामाध्यमेन गुरु-शिष्ययोः मध्ये अन्तःक्रियाः जायन्ते स्म। अर्थात् अध्यापनाय अध्ययनाय च संस्कृतभाषायाः अनुप्रयोगः क्रियन्ते स्म। या जनसामान्यानां प्रायः न वा मातृभाषा न च प्रादेशिकभाषा आसीत्। संस्कृतभाषा पण्डितभाषा आसीत्। अस्याः माध्यमेन अध्यापनम् अध्ययनं कठिनतरमेव भवतीति मनोविज्ञानिनाम् अभिमतं वर्तते।

**10. व्यवस्थितविद्यालयीयप्रणाल्याभावः-** वैदिककाले शिक्षायाः प्रसारः प्रचारः विकासश्च गुरुकुलादिषु क्रियन्ते स्म। तदानीं गुरुणाम्

आचार्याणां वा वैय्यक्तिकप्रयासानामनुसारं शिक्षा प्रदीयन्ते स्म। वैय्यक्तिकप्रबोधनविधेरनुसारमेव शिक्षा प्रदीयन्ते स्म। सामूहिकतया शिक्षायाः प्रसाराय अवसराः व्यवस्था च वैदिककाले प्रायः नासीदिति निश्चयेन वक्तुं शक्यते। अर्थात् वैदिककाले वैय्यक्तिकप्रबोधनं प्रचलने आसीत्, न तु सामूहिकी शिक्षा।

**11. शिक्षायै स्त्रीणाम् अधिकार अस्तं गतः-** ऋग्वेदकाले उपनयसंस्कारस्यायोजने विद्यार्जनाय च स्त्री-पुरुषयोः समाधिकाराः अवसराश्च प्रचलने आसन्। परन्तु उत्तरवैदिककाले स्त्रीणाम् उपनयनसंस्कारस्यायोजने भेदभावाः प्रतिषेधाश्च कुसमगता आसन्। स्मृति-संहिताग्रन्थेषु महिलानां स्वतन्त्रताधिकाराः समताधिकाराः प्रतिषेधिताः आसन्। स्त्री विद्या प्रलयान्तकी इति, न स्त्री स्वातन्त्र्यमर्हतीत्यादि आभाणकाणां कुप्रचारश्च उत्तरवैदिककालैव जात आसीत्। वैदिककाले केवलं वचनेषु स्त्रीणां प्रंशसाः, कार्येषु प्रतिषेधाः प्रचलने आसन्। पृथिव्याम् आकाशे च अर्धभागो भवति महिला इति वैदिकोक्तिः उत्तरवैदिककाले कूटनैतिकतया तिरस्कृता आसीत्। सम्प्रत्ययोयम् मानवाधिकारस्योल्लंघनम् अमानवीयश्च भवति।

**12. कण्ठस्थीकरणस्यैव प्राधान्यम् -** वैदिककाले मुद्रणकलायाः विकासो नैव जातः। एवमेव मुद्रितपुस्तकानाम् अभावश्च दृश्यते स्म। उत्तरवैदिककाले अध्यापनाय अध्ययनाय च केषाञ्चन पाण्डुलिपिग्रन्थानाम् उपयोगः क्रियन्त इति प्रमाणानि समुपलभ्यन्ते। अध्यापनम् अध्ययनञ्च पूर्णतया मौखिकविधीनामनुसारं क्रियन्ते स्म। अन्तेवासिनः श्रवण-गान-मनन-ध्यान-प्रतिफलादि विधीनाम् आधारेण अधिगच्छन्ति स्म। प्रक्रियायामस्याम् अन्तेवासिनः अधीतमन्त्रस्थ विषयस्थ वा अर्थं नैव जानन्ति स्म, केवलं शब्दस्यैव प्राधान्यं यच्छन्ति स्म। अत एव अध्ययने कण्ठस्थीकरणाय प्राधान्यं यच्छन्ति स्म। प्रक्रियेयम् अमनोवैज्ञानिकी च भवति। वर्तमानशिक्षायाम् एतादृशा अध्ययनविधयः नैव प्रोत्साहनीयाः भवन्ति।

**13. वैचारिकस्वतन्त्रस्य अभावः-**वैदिकशिक्षायां धर्मस्य अतीवमहत्वप्रदानेन जनानां विचारेषु प्रवृत्तिषु च वैदिकग्रन्थेषु यल्लिखित अवर्तत, तदेव पूर्णतया सत्यमिति, नास्त्यत्र लेशमात्रमपि सन्देह इति (असत्यमिति वैज्ञानिकतया निरुपणात्परमपि) मन्यन्ते स्म। केचन स्वार्थपरायणैः वैदिकसाहित्ये काल्पनिकाः मन्त्राः (ये पूर्ववर्तिभिः विरोधाभासिन आसन्) प्रक्षिप्ता आसन्। तादृशानां मन्त्राणां प्रश्नकरणाय चावसराः जनसामान्याय नैव समुपलभ्यन्ते स्म।अज्ञानेन विविधप्रकारकानाम् अन्धविश्वासादीनां जन्म जायते स्म।

**14. नूतनधर्माणाम् आविर्भावः-**ख्रीष्टाब्देः पूर्वं पञ्चमशतकात्पूर्व काले वैदिकशिक्षा सम्पूर्णतया पुरोहितानां ब्राह्मणानां वा केन्द्रिता जाता आसीत्। शिक्षाव्यवसायस्योपरि केवलं तेषामेव एकमात्राधिकारः आसीत्। तेषाम् अधिपत्यसंरक्षणार्थं धर्मस्य स्मृतिग्रन्थानाञ्च सहायता स्वीकृता आसीत्। उत्तरवैदिककाले धार्मिकग्रन्थेषु बहवः प्रक्षिप्ताः, स्मृति-संहितादिषु वर्ण-लिङ्गयोराधारेण भेदभावाः प्रतिषेधाश्च कुसमागता आसन्। अनेन बहुमतजनानां दृष्टिकोणे परिवर्तितः, फलतः भारते जैन-बौद्धधर्मयोः आविर्भाव अभवत्। नूतनधर्माणाम् आविर्भावो नाम विद्यमानधर्मे शिथिलता अशक्तता एव कारणं भवतीति सुस्पष्टतया ज्ञायते।

**अनुशीलिताः-**


1. प्रो. लोकमान्य मिश्र, पुरातनी शिक्षा, मृगाक्षी प्रकाशनम्, लखनउ ।
2. संस्कृतनिबन्धशतकम्, चौकाम्बा प्राकशन, वाराणसी।
3. एस बी चौबे, भारत में शिक्षा का विकस, सेंट्रल बुक् डिपो, इलाहाबाद।
4. जौहरी और पाठक, भारतीयशिक्षा का इतिहास, विनोद पुस्तक मन्दिर, आगरा।
5. RadhaKumudMookerji:*Ancient Indian Education (Brahmanical & Buddhist)*, New Delhi.
6. Dr. Ramshakalpandey: *Development of Educational System in India* (Forth Edition), Agra.
7. M V Ramana Reddy : *World history in brief (Telugu)*; Kamala publications, Proddutor, Cuddapah, A P.
8. *Ancient Indian History (Vol 1 & 2)* ; Indian council for Historical Research, New Delhi
9. *Srimadvirat Veerabrahmendra Swami Charitra* (Telugu Movie) , 1984
10. *Sri Adi Shankaracharya (Sanskrit Movie) : Certificate No. 85470, 31/03/1983.*
11. *Shudra the rising (Hindi Movie) directed by Sanjeev Jaiswal*
12. The Fall of Harappa: Arrival of Aryans and Caste System (You tube Video)
13. http://en.wikipedia.org/wiki/Vedic_period
14. http://epaper.sakshi.com/apnews/Andhrapradesh-Main/17092015/Details.aspx?id=2918353&boxid=25517764


**Asst. Pro. in Edu., Rashtriya Sanskrit Sansthan, k.jSomaiya, Vidya Vihar (East),Mumbai-400077**

 ISSN – 2349-3100

# सूर्य सिद्धान्त का विशिष्ट सन्दर्भ और नवविध कालमान

✍डॉ. राजीव रंजन

त्रिस्कन्धात्मक ज्योतिषशास्त्र के सर्वप्रमुख स्कन्ध के रूप में सिद्धान्त ज्योतिष को स्वीकार किया गया है। यद्यपि सिद्धान्त संहिता और होरा इन तीनों की गणना स्कन्धत्रय के अन्तर्गत की जाती है[1], तथापि सिद्धान्त ज्योतिष के ज्ञान के बिना ज्योतिषशास्त्र रूपी गहन समुद्र में गति प्राप्त करना सम्भव नहीं है। सिद्धान्त ज्योतिष की महत्ता को स्थापित करते हुए वराहमिहिराचार्य ने अपने प्रसिद्ध ग्रन्थ “बृहत्संहिता” में कहा है कि ज्योतिषी को ग्रह गणित के प्रसङ्ग में “पौलिश, रोमक, वासिष्ठ, सौर और पैतामह” इन पाँच सिद्धान्तों में प्रतिपादित युग, वर्ष, अयन, ऋतु, मास, पक्ष, अहोरात्र, प्रहर, मुहूर्त, घटी, पल, प्राण, त्रुटि, त्रुटि के अवयव आदि कालों का तथा भगण, राशि, अंश, कला, विकला आदि क्षेत्रों का ज्ञाता अवश्य होना चाहिए।[2] सिद्धान्त ज्योतिष के विषयों के अध्ययन की परम्परा में सूर्य-मयासुर संवाद स्वरूप ‘सूर्य-सिद्धान्त’ ग्रन्थ की महती प्रतिष्ठा है। इस ग्रन्थ की प्राचीनता का समर्थन ग्रन्थ की विषयवस्तु से स्वयमेव हो जाता है। ग्रन्थारम्भ में ही इस ग्रन्थ का रचनाकाल कृत (सतयुग) माना गया है।[3] इस ग्रन्थ में सिद्धान्त ज्योतिष के विषयों यथा- त्रुटि से लेकर कल्पकाल तक की कालगणना, सौर-चान्द्र मासों का प्रतिपादन, ग्रहगतियों का निरूपण, व्यक्त-अव्यक्त गणित का प्रयोजन, विविध प्रश्नोत्तर विधि, ग्रह-नक्षत्र की स्थिति, नाना प्रकार के तुरीय-नलिका आदि यन्त्रों की निर्माण विधि, दिक्, देश, कालज्ञान के अनन्यतम उपयोगी अंग, अक्ष क्षेत्र सम्बन्धी सिद्धान्त, अक्षज्या, लम्बज्या, द्युज्या, कुज्या, तद्धृति, समशंकु का आनयन, ग्रह गति, ग्रह कारण, भगण, चन्द्र-ग्रहण, सूर्यग्रहण, ग्रह उदयास्त, ग्रह युति, ग्रह युद्ध, अहोरात्र व्यवस्था, भुवन संस्था, क्रान्तिवृत, ऋतु, अयन, संक्रान्ति, नवविधकालमान आदि में से अधिकांश विषय पर अत्यन्त विस्तारपूर्वक वर्णन किया गया है।

काल विषयक परिचर्चा के सन्दर्भ में सर्वप्रथम काल के दो भेद किए गए- लोकसंहारक काल तथा गणनात्मक काल- “लोकानामन्तकृत् कालः कालोऽन्यः कलनात्मकः।”[4] काल के इस द्विविधि भेद के बाद गणनात्मक काल को इस ग्रन्थ में प्रमुखता दी गई है। इस गणनात्मक काल को भी स्थूल व सूक्ष्म अथवा मूर्त व अमूर्त दो भेदों में विभक्त किया गया।[5] पुनः त्रुट्यादि अमूर्त या सूक्ष्म कालमान पर विशेष चर्चा न करते हुए प्राणादि मूर्त अथवा स्थूल कालमानों पर अत्यन्त गहन व विस्तृत चर्चा की गई है। सूर्य व मयासुर के मध्य संवादरूप इस ग्रन्थ में व्यक्त काल को ‘नवविध’ माना गया और कहा गया- “ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम्। सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव।”[6] अर्थात्- ब्राह्म, दिव्य, पित्र्य, प्राजापत्य, गौरव या बार्हस्पत्य, सौर, सावन, चान्द्र तथा नाक्षत्र ये नवविध कालमान स्वीकार किए गए हैं। कालमान के इस नवधा विभाजन को अन्य ऋषियों तथा अपेक्षाकृत अर्वाचीन दैवज्ञों ने भी स्वीकार किया है। पौलस्त्य के अनुसार- “ब्राह्मं दैवं मनोर्मानं पैत्र्यं सौरं च सावनम्। नाक्षत्रम् च तथा चान्द्रं जैवं मानानि वै नव।।” इसी प्रकार भास्कराचार्य व आचार्य कालिदास ने अपने ग्रन्थों क्रमशः “सिद्धान्तशिरोमणि”[7] तथा “ज्योतिर्विदाभरणम्”[8] में इन्हीं नवधा कालमानों को स्वीकृति प्रदान की है। व्यवहारप्रदीप में भी कहा गया है- “सौरमैन्दवमार्क्षं च दैवं जैवं च सावनम्। पैत्र्यं च मानुषं ब्राह्ममिति मानानि वै नव।।”[9] अभिप्राय यह है कि सूर्य-सिद्धान्त प्रोक्त नवधा कालमान को परवर्त्ती आचार्यों तथा ग्रन्थकारों ने एकमत से स्वीकृति प्रदान की है। इन नवधा कालमानों को अध्ययन की दृष्टि से सावन, नाक्षत्र, चान्द्र, पित्र्य, सौर, दैव, गौरव या बार्हस्पत्य, प्राजापत्य तथा ब्राह्म क्रम से प्रस्तुत करना उचित प्रतीत होता है। (1) सावन मान- “सावनोऽर्कोदयैः।” अर्थात् सावन मान सूर्योदय पर आधारित होता है। दो सूर्योदयों के मध्य का काल स्पष्ट सावन दिन होता है।[10] इसी सावन मान के सम्बन्ध में सूर्यसिद्धान्त स्पष्टतया कहता है- “उदयादुदयं मानोः सावनं तत् प्रकीर्तितम्।”[11] इस सन्दर्भ में एक जिज्ञासा सहज ही उत्पन्न होती है कि सूर्योदय किसे मानें? जब

ISSN – 2349-3100

सूर्यमण्डल का प्रथम बिन्दु क्षितिज से उदित हो अथवा जब सूर्यमण्डल का केन्द्र क्षितिज से बाहर आ जाए। इस जिज्ञासा का सहज समाधान यह है कि जब सूर्यमण्डल का केन्द्र क्षितिज से बाहर आ जाए तब उसे सूर्योदय माना जाएगा। इसी प्रकार के 30 सावन दिनों का समूह एक सावन मास कहा जाता है तथा 12 सावन मासों का एक सावन वर्ष होता है। सावन दिन का मान सामान्यतया नाक्षत्र अहोरात्र से 4 मिनट बड़ा होता है। परन्तु सावन दिन का मान बदलता रहता हैं इस सावन कालमान का उपयोग यज्ञादि, सूतकों का निर्धारण, दिनेश-मासेश-वर्षेश आदि के निर्णय तथा मध्यम ग्रहगति के निर्णय में किया जाता है।[12] (2) नाक्षत्र कालमान- भचक्र अर्थात् नक्षत्रमण्डल का दैनिक भ्रमण कालमान एक नाक्षत्र दिन होता है।[13] अभिप्राय यह है कि जितने काल में नक्षत्र मण्डल का एक चक्रभ्रमण पूर्ण होता है, उतना काल नाक्षत्र दिन कहा जाता है। नाक्षत्र दिन का मान ज्ञात करना अत्यन्त ही सहज है। किसी भी नक्षत्र के उदय काल को नोट कर लें, अर्थात् जिस समय कोई नक्षत्र क्षितिज पर उदित हो रहा हो वह समय लेना होता है, अगले दिन वही नक्षत्र जब पुनः उदित हो तो वह समय भी नोट कर लें। पहले दिन के नक्षत्र उदय काल तथा दूसरे दिन के नक्षत्र उदय काल के मध्य के कालमान के तुल्य ही नाक्षत्र अहोरात्र का भी मान होता है। सामान्यतया दोनों उदयों के बीच का समय 23 घंटा, 56 मिनट और 4 सेकेंड के तुल्य होता है। नाक्षत्र अहोरात्र का मान सामान्यता एक सा ही रहता है, इसमें वृद्धि या ह्रास नहीं होता है। हाँ इतना अवश्य है कि यदि तारों की बहुत सूक्ष्म गति पर विचार किया जाय तो इस मान में अत्यल्प भेद आ जाता है। नक्षत्र उदय का काल ज्ञात करना किञ्चित श्रमसाध्य है, क्योंकि ऐसे क्षितिज को ढूँढना जहाँ वृक्ष, पर्वतादि न हो, एकदम समतल मैदान हो मिलना कठिन है अतः अत्यधिक सूक्ष्म गणना के लिए उदयकाल से समय की परीक्षा नहीं की जाती है, अपितु मध्याह्न काल से की जाती है। इस दृष्टिकोण से नाक्षत्र अहोरात्र की परिभाषा इस प्रकार भी दी जाती है- “वसन्त सम्पात बिन्दु जिस क्षण याम्योत्तर वृत्त पर आता है, उस क्षण से लेकर फिर यह बिन्दु जिस क्षण याम्योत्तर वृत्त पर आता है उस क्षण तक के समय को नाक्षत्र दिन कहते हैं।”[14] इसी प्रकार 30 नक्षत्र अहोरात्रों का एक नाक्षत्र मास तथा 12 नाक्षत्र मासों का एक नाक्षत्र वर्ष होता है। मासों के नामकरण का आधार भी नक्षत्र ही हैं। पूर्णिमा के अन्त में चन्द्रमा जिस नक्षत्र में होता है, उसी के नाम पर मासों का नामकरण होता है।[15] (3) चान्द्रमान- चन्द्रमा की गति को आधार मानकर भी कालगणना की जाती है। अमावस्या को सूर्य और चन्द्रमा एक साथ रहते हैं। सूर्य और चन्द्रमा की इस युति के बाद सूर्य से पृथक् होकर चन्द्रमा पूर्व दिशा की ओर प्रतिदिन जितना जाता है उसे ही चान्द्रमान कहते हैं। अभिप्राय यह है कि जब सूर्य तथा चन्द्रमा के मध्य 12 अंश का अन्तर होता है, तो एक तिथि व्यतीत होती है।[16] इसी प्रकार की तीस तिथियों से एक चान्द्रमास बनता है। चन्द्रमा की कलाओं के आधार पर इस चान्द्रमास को दो पक्षों शुक्ल पक्ष तथा कृष्ण पक्ष में विभक्त किया गया है। इस तरह शुक्ल पक्ष तथा कृष्ण पक्ष दोनों में ही 15-15 तिथियाँ होती हैं। शुक्ल पक्ष की पन्द्रहवीं तिथि को पूर्णिमा तथा कृष्ण पक्ष की पन्द्रहवीं तिथि को अमावस्या कहा जाता है। अमावस्या तिथि को आकाश में चन्द्र बिंब दिखाई नहीं देता है, परन्तु अगले ही दिन से चन्द्र बिंब धीरे-धीरे दिखाई देने लगता है। अतः जब आकाश मण्डल में चन्द्र बिंब क्रमशः बढ़ता हुआ दिखाई देता है तो वह पक्ष शुक्ल पक्ष कहा जाता है, जबकि पूर्णिमा के बाद का पक्ष जब चन्द्र बिंब क्रमशः घटता हुआ प्रतीत होता है, कृष्ण पक्ष कहा जाता है। इन्हीं 12 चान्द्र मासों के मिलने से एक चान्द्र वर्ष का निर्माण होता है। चान्द्र मासों का नामकरण नक्षत्रों के आधार पर किया जाता है। पर्वान्त अर्थात् पूर्णिमा के दिन चन्द्रमा जिस नक्षत्र में होता है, उसी नक्षत्र के आधार पर उस मास का नामकरण होता है।[17] फाल्गुन, भाद्रपद तथा आश्विन मास में तीन नक्षत्रों में से किसी

 ISSN – 2349-3100

एक का योग बन सकता है, जबकि अन्य मासों में पर्वान्त पर दो में से किसी एक नक्षत्र के योग की संभावना होती है और उसी के आधार पर उस मास की संज्ञा होती है। अधोलिखित सारिणी द्वारा इसे स्पष्टतः समझा जा सकता है-

| **पर्वात नक्षत्र** | कृ रा | मृग. आर्द्रा | पुनर्वसु पुष्य | आश्लेषा मघा | पूफा. उ. फा. हस्त | चित्रा स्वाती | विशाखा अनुराधा | ज्येष्ठा मूल | पूर्वाषाढा उत्तराषाढा | श्रवण घनिष्ठा | शत.पू.भा. उत्तराभाद्रपद्र | रेवती, अश्वनी |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| **मास** | कार्त्तिक | मार्गशीर्ष | पौष | माघ | फाल्गुन | चैत्र | वैशाख | ज्येष्ठ | आषाढ | श्रावण | भाद्रपद | अश्विन |

अभिप्राय यह है कि यदि पूर्णिमा को कृत्तिका नक्षत्र का योग हो रहा हो अथवा रोहिणी नक्षत्र में चन्द्रमा हो वह मास कार्त्तिक मास के नाम से जाना जाएगा। (4) पित्र्य मान- पित्र्य कालमान का सम्बन्ध चान्द्र मास से है। हम जानते हैं कि 30 चान्द्र तिथियों का एक चान्द्रमास होता है, तथा यही चान्द्रमास पितरों का एक अहोरात्र होता है।[18] अमावस्या तिथि को इस पित्र्य अहोरात्र की मध्याह्न होती है तथा पूर्णिमा तिथि को पितरों की मध्यरात्रि होती है। कृष्ण पक्ष की साढे सात तिथि से पित्र्य अहोरात्र का दिनारम्भ होता है तथा शुक्ल पक्ष की साढे सात तिथि से पितरों की रात्रि का आरम्भ होता है।[19] चान्द्र कालमान का प्रयोग तिथि, करण, विवाह, मुण्डन, व्रत-उपवास, यात्रा विषयक विचार, जातकर्म सदृश अन्य सभी कार्यों में होता है। चन्द्रमा के ऊपरी भाग में पितरों का निवास होता है और वे चन्द्रमा को अपने नीचे मानते हैं। पितरलोक में कृष्ण पक्षार्ध में सूर्य का उदय और शुक्ल पक्षार्ध में सूर्यास्त होना स्वभावतः सिद्ध है। (5) सौरमान- “प्रतिदिनं स्फुटभुक्तिमितिः सदा खरगभस्तिदनं विबुधैः स्मृतम्।”[20] अर्थात् स्पष्ट सूर्य की एक दिन सम्बन्धी गति तुल्य काल को एक सौर दिन कहते हैं। एक संक्रान्ति से दूसरी संक्रान्ति पर्यन्त अर्थात् सूर्य जितने समय तक एक राशि पर रहता है, सौर मास कहा जाता है इन्हीं बारह सौरमासों का एक सौर वर्ष होता है।[21] दिन-रात्रि मान, षडशीतिमुख संक्रान्तियों का मान, अयन, विषुव तथा संक्रान्तियों का पुण्यकाल विषयक मान सौर कालमान द्वारा ही ज्ञात किया जाता है। तुलारम्भ से प्रत्येक 86वें दिन एक षडशीतिमुख संक्रान्ति होती है, इसके अतिरिक्त दो विषुव संक्रान्ति, दो अयन संक्रान्ति तथा 4 विष्णुपदी संक्रान्तियाँ भी होती हैं। विषुव संक्रान्ति (मेष, तुला), अयन संक्रान्ति (कर्क, मकर), षडशीतिमुख संक्रान्ति (मिथुन 18 अंश, कन्या 14 अंश, धनु 6 अंश तथा मीन 22 अंश) तथा विष्णुपदी संक्रान्ति (वृष, सिंह, वृश्चिक, कुम्भ) का मान सौर कालमान पर ही आधारित है। इसी प्रकार सूर्य के मकर राशि में संक्रमण काल से छः मास पर्यन्त अर्थात् मिथुनान्त तक सूर्य उत्तरायण होते हैं, जबकि कर्क संक्रान्ति से छः मास पर्यन्त अर्थात् धनुरन्त तक सूर्य दक्षिणायन होते हैं।[22] ऋतु निर्णय प्रसङ्ग में स्पष्ट है कि उत्तरायण के आरम्भ से शिशिर, वसन्त व ग्रीष्म ऋतु तथा दक्षिणायन के आरम्भ से वर्षा, शरत् तथा हेमन्त ऋतुएँ क्रम से घटित होती हैं। इसी सन्दर्भ में सूर्य सिद्धान्त का वचन है- “द्विराशिनाथा ऋतवस्ततोऽपि शिशिरादयः”[23] अभिप्राय है कि दो-दो राशियों का भोगकाल ऋतु कहा जाता है। (6) दैव कालमान- यह कालगणना सौरमान पर आधारित है। अर्थात् बारह सौर मासों का एक सौर वर्ष होता है तथा यही एक सौर वर्ष देवताओं के एक अहोरात्र के तुल्य होता है।[24] इसी तथ्य को और अधिक स्पष्ट करते हुए कहा गया है कि सूर्य के बारह राशियों के भोगकाल में देवताओं और दैत्यों का विपर्यय से क्रमशः अहोरात्र की व्यवस्था होती है। अर्थात् जब सायन सूर्य दक्षिणायन अर्थात् कर्कादि छः राशियों में होता है तब देवताओं की रात्रि होती है और ठीक इसी समय असुरों का दिन होता है।

 ISSN – 2349-3100

इसी प्रकार जब सायन सूर्य उत्तरायण अर्थात् मकरादि छः राशियों में होते हैं तब देवताओं का दिन होता है तथा उसी समय असुरों की रात्रि होती है। पृथिवी के उत्तरी-ध्रुव पर देवताओं का तथा दक्षिणी-ध्रुव पर असुरों का निवास माना गया है। आधुनिक शोध द्वारा यह बात प्रामाणित है कि ध्रुवीय प्रदेशों में छः मास का दिन और छः मास की रात्रि होती है। सौर कालमान के अनुसार एक सौर वर्ष का मान एक दिव्य अहोरात्र के तुल्य होता है, अतः 360 सौर वर्षों का एक दिव्य वर्ष होता है। (7) प्राजापत्य मान- मन्वन्तर व्यवस्था के अन्तर्गत एक मनु के तुल्य काल प्राजापत्य मान कहा जाता है और इस प्राजापत्य मान में अहोरात्र का भेद नहीं होता है।[25] प्राजापत्य मान को समझने के लिए युग, महायुगादि की परिकल्पना को स्पष्ट करना अनिवार्य है। एक सौर वर्ष के तुल्य एक दिव्य अहोरात्र का मान होता है और 360 सौर वर्षों के तुल्य एक दिव्य वर्ष होता है। बारह हजार दिव्यवर्ष या 4320000 सौर वर्षों (12000×360) के प्रमाण तुल्य एक चतुर्युग या महायुग होता है।[26] 71 महायुगों (चतुर्युगों) के बराबर 1 मनु कहा गया है।[27] अर्थात् यदि एक मनु के अन्तर्गत दिव्य वर्षों की गिनती करें तो इसका मान 71×12000 (एक चतुर्युग मान) = 852000 दिव्य वर्ष होता है और यदि इसे हम सौर वर्षों में परिवर्तित करें तो यह 852000×360 (एक दिव्य वर्ष में सौर वर्षों की संख्या) = 306720000 सौर वर्ष के बराबर होता है। इसके साथ एक ध्यातव्य तथ्य यह है कि प्रत्येक मनु के आरम्भ तथा मनु की समाप्ति पर कृतयुग अर्थात् सतयुग तुल्य (4800 दिव्य वर्ष) की सन्धि होती है तथा इस सन्धि काल में सम्पूर्ण पृथिवी पर जल-प्लावन रहता है।[28] एक चतुर्युग का मान 12000 दिव्य वर्ष कहा गया है, इस कालमान में कृत-त्रेता-द्वापर-कलियुग के वर्षमान के साथ-साथ कृतादि युगों के सन्ध्या तथा सन्ध्यांशों का मान भी सम्मिलित है। महायुग में चार लघु युग होते हैं तथा इनका कालमान धर्मपाद व्यवस्था के अनुरूप होता है, अर्थात् महायुग के मान के दशमांश को क्रमशः चार, तीन, दो तथा एक से गुणा करने पर क्रमशः कृत, त्रेता, द्वापर तथा कलियुग का मान स्पष्ट होता है। प्रत्येक युग के मान के षष्ठांश के तुल्य लघु युगारम्भ तथा लघु युग समाप्ति पर एक-एक संधियाँ भी होती हैं। अर्थात् सन्ध्या तथा सन्ध्यांश से युक्त कृतादि युगों का मान क्रमशः 4800, 3600, 2400 तथा 1200 दिव्य वर्षों के तुल्य होता है। जबकि इन लघुयुगों के सन्धिकाल का मान क्रमशः 800, 600, 400 तथा 200 दिव्य वर्ष होता है। (8) ब्राह्म मान- “ब्राह्मं कल्पः प्रकीर्तितम्” अर्थात् कल्प के तुल्य ही ब्राह्म मान होता है।[29] अभिप्राय यह है कि एक कल्प प्रमाण के तुल्य ब्रह्मा का दिन तथा एक कल्प के तुल्य ब्रह्मा की रात्रि का मान होता है। दो कल्पों के कालमान तुल्य ब्रह्मा का एक अहोरात्र होता है। एक कल्प में कुल 14 मनु होते हैं तथा प्रत्येक मनु के आरम्भ तथा समाप्ति पर कृतयुग प्रमाण तुल्य एक संधि भी होती है। इस प्रकार एक कल्प में कुल 14 मनु तथा 15 संधियाँ होती है। यदि एक कल्प के मान को दिव्य वर्षों में स्पष्ट करें तो- एक कल्प = 14 मनु + 15 सन्धि (कृतयुग तुल्य)। (14×852000) + (15×4800) = 11928000 + 72000 = 12000000 दिव्य वर्ष। (9) बर्हिस्पत्य या गौरव वर्ष- जिस मास में गुरु उदय या अस्त होते हैं, उस मास के अमावस्या तिथि को जो नक्षत्र हो, उसी नक्षत्र के नाम से गुरु वर्ष प्रारम्भ होता है।[30] कृतिकादि दो-दो नक्षत्रों में बृहस्पति के रहने से कार्त्तिक आदि बारह मास की तरह बारह वर्ष होते हैं, इनमें केवल पञ्चम एकादश और द्वादश वर्ष तीन-तीन नक्षत्र के होते हैं।[31] अभिप्राय यह है कि जिस तरह कार्तिक, मार्गशीर्ष पौषादि संज्ञक द्वादश मास होते हैं, ठीक उसी प्रकार बृहस्पति पर आधारित कार्त्तिकादि संज्ञक बारह वर्ष भी होते हैं तथा इन बारह वर्षों से सम्बन्धित विस्तृत फलकथन कई ग्रन्थों में उपलब्ध होता है। यहाँ यह ध्यान देने योग्य बात है, कि बृहस्पति के ये नक्षत्र संज्ञक वर्ष प्रभवादि 60 संवत्सरों से भिन्न होते हैं। ‘लघुवशिष्ठ सिद्धान्त’ में स्पष्टतया कहा गया है कि गुरु

 ISSN – 2349-3100

की मध्यम गति से तुल्य एक राशि में संचारवश जितना समय व्यतीत होता है, वही गुरु का एक वर्ष माना जाता है। प्रभवादि साठ सम्वत्सरों के आरम्भ के विषय में कहा गया कि "माघ शुक्ल के प्रारम्भ से जब शुक्ल पक्ष में, घनिष्ठा नक्षत्र में सूर्य, चन्द्र, गुरु विद्यमान थे तभी इन 60 प्रभवादि सम्वत्सरों की प्रवृत्ति हुई थी।[32] पाँच वर्षों का एक युग माना जाता है, तथा युगों की संख्या बारह होती है, इस प्रकार बारह युगों में कुल 60 वर्षात्मक काल होता है। इन 60 संवतों की संज्ञा क्रमशः इस प्रकार है- प्रभव, विभव, शुक्ल, प्रमोद, प्रजापति, अङ्गिरा, श्रीमुख, भाव, युवा, धाता, ईश्वर, बहुधान्य, प्रमाथी, विक्रम, वृष, चित्रभानु, सुभानु, तारण, पार्थिव, व्यय, सर्वजित्, सर्वधारी, विरोधी, विकृत, खर, नन्दन, विजय, जय, मन्मथ, दुर्मुख, हेमलम्ब, विलम्ब, विकारी, शार्वरी, प्लव, शुभकृत्, शोभन, क्रोधी, विश्वावसु, पराभव, प्लवंग, कीलक, सौम्य, साधारण, विरोधकृत, परिधावी, प्रमाथी, आनन्द, राक्षस, अनल, पिङ्गल, कालयुक्त, सिद्धार्थ, रौद्र, दुर्मति, दुन्दुभी, रुधिरोद्गारी, रक्ताक्ष, क्रोधन और क्षय। इन 60 सम्वत्सरों में कुल 12 युग व्यतीत होते हैं तथा इन बारह युगों के अधिपतियों की भी बात की गई है तथा ये क्रमशः विष्णु, बृहस्पति, इन्द्र, अग्नि, प्रजापति, अहिर्बुधन्य, पितर, विश्वेदेवा, सोम, इन्द्राग्नि, अश्विनी कुमार और सूर्य हैं।

यद्यपि सूर्यसिद्धान्त में नवविधकालमानों की चर्चा हुई है, परन्तु इन नवविध कालगणना पद्धति में भी केवल सौर, चान्द्र, नाक्षत्र तथा सावन मान का ही व्यवहार होता है[33], बार्हस्पत्य मान की आवश्यकता साठ संवत्सरों के ज्ञान में होती है तथा शेष चार अर्थात् ब्राह्म, पित्र्य, दिव्य व प्राजापत्य मानों की आवश्यकता नित्य व्यवहार में नहीं होती है। सूर्य सिद्धान्त प्रोक्त इन नवविध कालमानों की गणना पद्धति व सिद्धान्त को परवर्त्ती दैवज्ञों ने भी अपनी रचनाओं में प्रमुखता से स्थान दिया है, जो इन सिद्धान्तों की सार्वभौमिकता तथा स्वीकार्यता का परिचायक सिद्ध होता है।

## पाद टिप्पणी

**1. बृहस्पतिसंहिता, 1/5, 2. बृहत्संहिता, 2/4, 3. सूर्यसिद्धान्त, 1/2, 4. वही, 1/10, 5. वही, 6. वही, 14/1, 7.सिद्धान्तशिरोमणि, 8. ज्यातिर्विदाभरणम्, 1/3, 9. बृहद्दैवज्ञरञ्जनम्, 3/64, 10. ज्योतिर्विदाभरणम्, 1/5, 11. सूर्यसिद्धान्त, 14/18, 12. वही, 13. वही, 14/15, 14. सूर्यसिद्धान्त, विज्ञान भाष्य, पृ. 337, 15. सूर्यसिद्धान्त, 14/15, 16. वही, 14/12, 17. वही, 14/15-16, 18. वही, 14/14, 19. सिद्धान्तशिरोमणि, 20. ज्योतिर्विदाभरणम्, 1/5, 21. सूर्यसिद्धान्त, 1/13, 22. वही, 14/9-10, 23. वही, 14/10, 24. वही, 1/13, 25. वही, 14/21, 26. वही, 1/15, 27. वही, 1/18, 28. वही, 29. वही, 14/21, 30. वही, 14/17, 31. बृहत्संहिता, 8/2, 32. वृहदैवज्ञरञजनम्, 4/5, 33. सूर्य सिद्धान्त, 14/2**

**सहायक प्राफेसर, संस्कृत विभाग दिल्ली विश्वविद्यालय**

ISSN – 2349-3100

# व्याकरणज्योतिषयोरालोके आजीविकाविचारः

✍ योगेशकुमार

जन्मनारभ्यः मृत्युपर्यन्तं मनुष्यो नैकानि कर्माणि कुरुते। यतो हि भूमिरियं कर्मलोकश्चेति कथ्यते। कर्माणि पुण्यानि पापानि च भवन्ति एतदतिरिच्य आवश्यकतायाः प्रश्ने समुपस्थिते सर्वप्रथमं उदरपूर्त्यै प्रयत्नो विधत्ते प्राणिमात्रः। मनुष्यश्च स्वजठरपूर्त्यै नानाविधकर्माणि कुरुते , तान्येव आजीविकारूपेण प्रोच्यन्ते। अस्मच्छास्त्रेषु च आजीविकासन्दर्भे ज्योतिषशास्त्रस्य महत्त्वं सर्वातिशायी वर्तते। ज्योतिषशास्त्रेणैव ज्ञायते यत् को मनुष्यः, कया आजीविकाया स्वीयं निर्वाहं करिष्यति, एतस्यैव कानिचन् उदाहराणि पश्यामः-

**1.कृषिकर्मणाजीविकायोगाः-** यस्य चुतुर्थ भावे चन्द्रः स्यात् तदा जातकः कृषिमाध्यमेन आजीविकां कृत्वा सुखं प्राप्नोति।[1] कर्कराशौ स्थितः शनिः गुरुणा दृष्टः भवति[2]यदि भाग्य भावे चन्द्र-शुक्र-शनयो भवन्ति।[3]यदि तृतीयभावे कर्कराशिः भवति तदा मनुष्यः कृषिकर्मणा युक्तः स्यात्।[4]

**2.चिकित्सकयोगाः-** यदि कुण्डल्यां सूर्यस्य-चन्द्रस्य-कुजस्य बुधस्य च योगः भवेत् चेत् तदा जातकः चिकित्सकः भवति।[5] यदि कुण्डल्यां चन्द्राद् दशमे स्थिताः पापग्रहाःशुभग्रहैःदृष्टाः स्युः।[6]यदि कुण्डल्यां वृषभराशौ गुरुःविद्यते।[7]
धनुराशौ सूर्यो भवति।[8]

**3.वनाधिकारीयोगाः-**यदि कुण्डल्यां कुजः सिंहराशौ भवेत् तदा जातकः वनप्रान्तेषु भ्रमणशीलः अर्थात् वनाधिकारीः भवितुमर्हति।[9]यदि जन्मकाले गुरुराशौ अर्थात् (धनु-मीने) स्थितः शनिः, शुक्रेण दृष्टश्चेत् तदा जातकः वनाधिकारीः भवति।[10]

**4. राज्यकर्मचारीयोगाः-** कारकांशलग्ने यदि सूर्यः भवति चेत्तदा जातकः राज्यकर्मचारी भवेत्।[11] यदि सूर्यः केन्द्रे भवति चेत् तदा जातकः राज्यकर्मचारी भवति।[12]कन्याराशौ स्थितः चन्द्रः यदि गुरुणा दृष्टश्चेत् तदा जातकः राज्यकर्मचारी भवेत्।[13]

**5. लेखकयोगाः-**यदि कुण्डल्यां बुधः स्वोच्चे भवति चेत् तदा जातकः लेखकः भवति ।[14]वृषभे अथवा तुलायां स्थितः सूर्यः यदि बुधेन दृष्टो भवेत्।[15]यदि कुण्डल्यां चन्द्राद् दशमराशौ बुध-गुरु-शनयः स्युः।[16]शुक्रयुक्तः शनिः भवेत्।[17]

**6. सङ्गीतयोगाः-**शुक्रः यदि स्वोच्चे भवति चेत् तदा जातकः संङ्गीत,नृत्यस्य माध्यमेन प्रेमी भूत्वा आजीविका करोति ।[18]मकरे अथवा कुम्भराशौ स्थितो भूत्वा शुक्रः यदि गुरुणा दृष्टः स्यात् तदा जातकः वादने सङ्गीतक्षेत्रे च निपुणो भवेत्।[19]यदि जन्मकाले सूर्यशुक्रौ एकस्मिन्भावे भवतश्चेत् तदा जातकःसङ्गीत वाद्ययन्त्रवादने च कुशलो भवति।[20] यदि सूर्यः चतुर्थभावे भवति तदा जातकःगीत वाद्यादिषु अनुरक्तः स्यात्।[21]

**7. अध्यापकयोगाः-** यदि कुण्डल्यां गुरुराशौ स्थितः बुधः, शुक्रेण दृष्टश्चेत् तदा जातकः अध्यापकः भवति ।[22]यदि कर्कराशौ स्थितः शनिः बुधेन दृष्टः स्यात्।[23]तुलाराशौ स्थितः चन्द्रः यदि बुधेन दृष्टश्चेत् तदा जातकः अध्यापकः भवति।[24]गुरोः नवांशगतस्य चन्द्रस्योपरि कुजस्य दृष्टिः भवेत्।[25]एवमेव आजीविकायै व्याकरणशास्त्रस्य भूमिकाऽपि महत्त्वपूर्णा वर्तते । यथा कोऽपि मनुष्यः संस्कृतविद्यालये नियुक्तो भवति, स कस्यापि शास्त्रस्य ज्ञाता भवेत् विना व्याकरणं तस्य जडता न नश्यति। साक्षात्कारे तु यदि संस्कृतभाषां वदति विना व्याकरणं, तदाऽपि सः अशुद्धमेव वक्ष्यति , तदा तस्मै वृत्तिर्दुर्लभा भविष्यति , अतः व्याकरणस्यापि आजीविकायै महत्ताऽस्त्येव। संस्कृतक्षेत्रेऽध्यापने क्षेत्रे च ते जनाः वैदुष्यपूर्णं कार्यं कुर्वन्ति येषां "गुरुः" जन्म कुण्डल्यां उच्चस्थानीयः भवति ।एवमेव जन्मकुण्डल्यां वैयाकरणयोगाभावे कोऽपि वैयाकरणः कथं भवेत् ? अतः वैयाकरणत्त्वप्राप्तये ग्रहाणामानुकूल्यमपि वाञ्छितमेव।व्याकरणशास्त्रज्ञाताऽपि यत्र कुत्रापि संस्कृत विद्यालये आधुनिके वा विद्यालयेऽध्यापनद्वारा स्वीयामाजीविकां प्राप्तुं सक्षमः। अतः व्याकरणशास्त्रस्य महत्यावश्यकतास्त्येवाजीविकाप्राप्तये। ज्योतिषद्वाराऽपि दैवज्ञो भूत्वा मनुष्यः स्वजीविकां निर्वोढुं क्षमः। अतः व्याकरणज्योतिषयोरालोके आजीविकाविचारः वास्तविकरूपेणाधुनिके काले सार्थक्यं भजते। व्याकरणज्ञाय बह्वयः आजीविकाः वर्तन्ते-

**1.दूरदर्शने संस्कृतसमाचारवाचकरूपेण।,2.व्याकरणशास्त्राध्यापन कार्येण।,3.आधुनिकविद्यालयेषु अध्यापनकार्येण। 4.विभिन्नसंस्कृतसंस्थासु अनुवादकरूपेण।,5.ग्रन्थानां टीकादिलेखन द्वारा।,6.व्यक्तिगतपाठनद्वारा।** एवमेव ज्योतिषज्ञानेनापि नैकाभिराजीविकाभिः जीवनं यापयितुं शक्यते मनुष्यः **1.दैवज्ञकर्मद्वारा।, 2.कर्मकाण्डद्वारा।, 3.ज्योतिषाध्यापकरूपेण,4.पञ्चाङ्गनिर्माणादिना।,5.रत्नविमर्शैः विक्रयणेन च।, 6.ज्योतिषीयपुस्तकलेखनेन।7. ज्योतिषीयपरामर्शदातृरूपेण। 8.ज्योतिषकनिष्ठशोधाध्येतारूपेण।9.वास्तुशास्त्रस्य विशेषज्ञरूपेण।**

इत्यादिभिराजीविकाभिर्मनुष्यः ज्योतिषशास्त्रेणापि सौख्येन निर्वाहं कर्तुं सक्षमः। इत्यादिरूपेण वयं पश्यामः यद्द्वाभ्यामेव शास्त्राभ्यां ज्योतिषव्याकरणाभ्यां मनुष्यः सारल्येन सुखेन च जीविकामाप्तुं सक्षमः।

## सन्दर्भ संकेताः –


1.जातकाभरणम्, रव्यादिग्रहभावफलम्, चतुर्थभावस्थितचन्द्रफलम्, श्लोकः-4

2.सारावली,अध्यायः-29,श्लोकः-47

3.सारावली,अध्यायः-32,श्लोकः-76

4.मानसागरी,अध्यायः-3,श्लोकः-4

5.लग्नचन्द्रिका,चतुर्थपरिच्छेदः,चतुर्ग्रहयोगाः,श्लोकः-1

6.सारावली,अध्यायः-33,श्लोकः-62

7.सारावली,अध्यायः-27,श्लोकः-4

8.बृहज्जातकम्,अध्यायः-18,श्लोकः-3

9.बृहज्जातकम्,अध्यायः-18,श्लोकः-7

10.सारावली,अध्यायः-32,श्लोकः-77

11.जातकतत्त्वम्, प्रकीर्णतत्त्वम,दशमविवेकः,श्लोकः-40

12.जातकतत्त्वम्, प्रकीर्णतत्त्वम्,दशमविवेकः,श्लोकः-41

13.सारावली,अध्यायः-23,श्लोकः-41

14.मानसागरीः,द्वितीयोऽध्यायः,त्रिग्रहयोगफलम्,श्लोकः-10

15.जातकाभरणम्-दृष्टिफलाध्यायः,शुक्रगृहे रवौबुधदृष्टिफलम्,श्लोकः-10

16.सारावली,अध्यायः-33,श्लोकः-46

17.बृहज्जातकम्, अध्यायः-14,श्लोकः-5

18.जातकपारिजातः,अध्यायः-8,श्लोकः-101

19.जातकाभरणम्,दृष्टिफलाध्यायः,शनिक्षेत्रगते शुक्रे गुरुदृष्टिफलम्,श्लोकः-41

20जातकाभरणम्,द्विग्रहयोगाध्यायः,सूर्यशुक्रयोगफलम्,श्लोकः-5

21मानसागरी,ग्र.फ, श्लोकः-4.

22सारावली,अध्यायः-26,श्लोकः-59

23.सारावली,अध्यायः-29,श्लोकः-46

24.जातकाभरणम्,दृष्टिफलाध्यायः,तुलाराशिगते चन्द्रे बुधदृष्टिफलम्,श्लोकः-39

25. बृहज्जातकम्,अध्यायः-19,श्लोकः-7


**शोधच्छात्रःराष्ट्रिय संस्कृत संस्थानम्  भोपालम्**

 ISSN – 2349-3100

# काव्यलक्षणविमर्श:

✍डा.स्वर्गकुमारमिश्र:

**"कुङ् शब्दे"** इति धातो: औणादिकेन **"अच इ"** इति सूत्रेण "इ" प्रत्यये कृते कवते इति कवि: । कविशब्दात् " **गुणवचनब्राह्मणादिभ्य: ष्यञ् कर्मणि चे**"त्यादिना ष्यञि वृद्धौ टिलोपे च निष्पन्न: काव्यशब्द: कविकर्मणि प्रवर्त्तते । किञ्च **"कु शब्दे"** इति धातो: **"ओरावश्यके"** इति पणिनिसूत्रेण १३/१/१२५ 'ण्यत्' प्रत्यये कृते **"अवश्यकवनीयं"** काव्यमिति कवे: अवश्यकर्त्तव्यं किमप्यपूर्वमनवद्यं कर्म । यदा कश्चिदपूर्वभाव: कवेर्मनसि उदेति तदा सोऽवश्यं प्रकाशनीय: इति धिया कवि: काव्यं कर्त्तुं प्रवर्त्तते । अत: साधूक्तम्– **"Poetry is the spontaneous overflow of powerful feelings."**

लोकोत्तरवर्णनानिपुणः कवि: । कवते सर्वं जानाति सर्वं वर्णयति सर्वं सर्वतो गच्छति अथवा कवते श्लोकान् ग्रथते वर्णयति वा इत्यस्मिन्नर्थे **"कवृ वर्णने"** इत्यस्माद्धातोः 'इन्' प्रत्यये 'कविः' ।

संस्कृतसाहित्यजगति कविर्ब्रह्मणो मूर्त्तस्वरूपमितिकथ्यते । **"यथास्मै रोचते विश्वं तथेदं परिवर्त्तते"** । अत: कविसृष्टिर्ब्रह्मणो सृष्ट्यपेक्षया गरीयसीति विविच्यते । (१) किञ्च **"कविर्मनीषी परिभू: स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधात्शाश्वतीभ्य: समाभ्य:**" इत्यादिना कवे: स्वातन्त्र्यं वेदेषु गीयते । कवि: क्रान्तदर्शी स्रष्टा च । लोकोऽयं सामान्येन यत्पश्यति तदेव विशिष्टरूपेण कवि: पश्यति । स: कल्पनायां भिन्नं राज्यं निर्माति तदाधारेण काव्यं च विदधाति । तस्य भावोद्वेलनं काव्यरूपं गृह्णाति । लोकस्थितभावानां व्यवहाराणाञ्च लोकोत्तरपरिप्रकाशनेन जनमानसं रञ्जयति सदुपदेशञ्च यच्छति । अत: मम्मटेनोक्तम्-

**"लोकोत्तरवर्णनानिपुणकविकर्म काव्यम्"**। (२) इति

काव्यं प्रतिभावत: कवे: किमप्यद्भूतमलौकिकञ्च कर्म येन हृदयमावर्जितं भवति सुखञ्च लभ्यते । तत्सुखं लौकिकसुखमिव संकीर्णं नास्ति । तत्तु ब्रह्मानन्दाय कल्पते । विषयान्तरविनिर्मुक्त: काव्यरसिक: स्वान्त:सुखमेव काव्येन भुङ्क्ते सद्य: परनिर्वृतश्च भवति ।

तदुक्तं **"काव्यामृतरसेनान्तश्चमत्कारो वितन्यते"** इत्यादिना । यद्वा साहित्यदर्पणकारेणोक्तम्-

**"सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दश्चिन्मय: ।**
**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥**
**लोकोत्तरचमत्कारप्राण: कैश्चित् प्रमातृभि: ।**
**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रस:॥"** इति(३)

भारतभूमौ काव्यविरचनपरम्परा वैदिककालादारभ्य प्रचलन्ती प्रतिष्ठते, अत्र नास्ति सन्देह: । तदाधारेण च काव्यशास्त्रनिर्माणमपि अस्यामेव भूमौ सुप्रतिष्ठिता राजते । भामह-दण्डी-उद्भट्ट-वामन-रुद्रट- आनन्दवर्धन - राजशेखर-भोजराज- मम्मट-विश्वनाथ-जगन्नाथादय: नैकेऽलङ्कारशास्त्रकारा: संस्कृतया गिरा काव्यविषयकविविधविचारान् स्व स्व ग्रन्थेषु भङ्ग्यन्तरेण परिप्रकाशितवन्तो दृश्यन्ते । त एव काव्यपरकविचारा: काव्यशास्त्रनाम्ना प्रसिद्ध्यन्ति । अथवा यस्मिन् खल्ववगते काव्यस्य निर्माणे स्वरुपदोषगुणालङ्कारादीनामवधारणे च शक्तिरुन्मीषति तत्काव्यशास्त्रमिति कथ्यते ।

काव्यशास्त्रेष्वेतेषु काव्यस्वरूपविमर्श: मुख्य: प्रतिपाद्य इत्यवगम्यते । तत्र किं काव्यपदवाच्यम् ? काव्यस्य काव्यत्वं वा कुत्र निहितमिति सर्वे अमी शास्त्रकारा: विचारयन्तो दृश्यन्ते । अत: प्राय: सर्वस्मिन् काव्यशास्त्रीयग्रन्थे ग्रन्थकृता किमप्येकं स्वानुरूपं काव्यस्य स्वरूपं लक्षणं वा प्रपञ्चितं पाठकानां दृष्टौ महदाकर्षणस्थानं लभते ।

स्वरुपं लक्षणं नाम । स्वं लक्ष्यपदार्थो रूप्यते लक्ष्यते इतरव्यावृत्ततया ज्ञायते इति स्वरूपम् । यद्वा काव्यकाव्येतरभेदनिर्णायक: अन्यूनानतिप्रसक्तो धर्म: । काव्यनिष्ठशाब्दबोधविशेष्यतावच्छेदकमिति यावत् । अर्थात् असाधारणधर्मवत्त्वेन इतरव्यावर्तकत्वं लक्षणस्य लक्षणम् । उक्तञ्च जगन्नाथेन-**“विशेष्यताऽवच्छेदकं तदितरभेदबुद्धौ साधनं च तल्लक्षणम्***”**इति । (४)

कस्यापि लक्षणमेकमसाधारणधर्मरूपं लक्ष्यमेव निरूपयति । तल्लक्षणं संक्षिप्तं सरलं पारिभाषिकताविनिर्मुक्तत्वेनासन्दिग्धमतिव्याप्त्यव्याप्त्यसम्भवदोषवर्जितञ्च भवेदित्यभिप्रायोऽ- नस्वीकार्य: । अत: लक्षणं यथा सुस्पष्टं स्यात्तदर्थं सावधानतया यत्नो विधीयेत । अत: समुपलब्धेषु काव्यशास्त्रीयग्रन्थेषु काव्यलक्षणं नियमानुकूलं कर्त्तुं चेष्टा यद्यपि विहिता तथापि पूर्वपूर्ववर्त्तीनामाचार्याणां लक्षणनिरसनपूर्वकं परवर्त्तीभिराचार्यै: काव्यस्य यल्लक्षणं निरमायि तदस्माकं विचार्यमिति धिया तेषां यथाक्रममुपस्थापनमालोचनञ्चात्र प्रस्तूयते ।

काव्यशास्त्रपरम्परायामाद्याचार्यरूपेण ख्यातो भामह: काव्यालङ्कारग्रन्थे **“शब्दार्थौ सहितौ काव्यमि”** (५)त्यादिना लक्षणेन शब्दार्थयो: काव्यत्वं सूत्रितम् । तदनु आचार्य: वामन: **“शरीरं तावदिष्टार्थव्यवच्छिना पदावली”** (६)ति काव्यलक्षणेन शब्दस्येव काव्यत्वं प्रत्यपादि । एवमेव तत्परवर्त्तिन: जगन्नाथपण्डितपर्यन्ता: आलङ्कारिका: विशिष्टस्य शब्दस्य शब्दार्थस्य वा काव्यत्वं यदभिहितवन्त:(७)तेन काव्यशास्त्रजगति लक्षणविचारपरम्परायां मार्गद्वयं प्रस्थापितम् ।

शब्दार्थोभयस्य काव्यत्वं ये स्वीकुर्वन्ति तेषु सर्वमान्य आचार्यमम्मट: **‘तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुन: क्वापि’**(८) इति यत्काव्यलक्षणं प्रस्तुतवान् तदद्यापि शब्दार्थोभकाव्यत्ववादिनां महत्तमानुभूतिरिरिति कथ्यते । तत्र शब्दार्थयो: अदोषत्वं सगुणत्वमलङ्कारसापेक्षत्वञ्च महद्वैशिष्ट्यमावहतीति चोद्घोष्यते ।

तथा हि मम्मटकृते काव्यलक्षणे तत्पदं काव्यपरामर्शकम् । तेन शब्दार्थौ काव्यमित्यर्थ:, काव्यत्वावच्छेदकस्य शब्दार्थोभयनिष्ठत्वात् । काव्यं श्रुतं काव्यं बुद्धञ्चेत्युभयविधव्यवहारदर्शनात् , **“नामरूपे व्याकरवाणीति”** “ **वागर्थाविवसंपृक्ता”**विति च वैदिकलौकिकप्रयोगात् काव्यत्वं चमत्कारिबोधजनकज्ञानविषयत्वाऽवच्छेदकधर्मवत्त्वाच्च शब्दार्थोभयमाश्रित्य व्यासज्यवृत्त्या स्थितम् । एवञ्च आस्वादोद्बोधसमर्थस्य व्यञ्जनाव्यापारस्यापि शब्दवदर्थवृत्तित्वयोगात्, अलङ्कारादिगणनायामपि तथाविशेषात् शब्दार्थयुगलस्य काव्यत्वं सुकल्पितम् । तन्नागेशेन समर्थितं रसगङ्गाधरमर्मप्रकाशे-**“आस्वादव्यञ्जकत्वस्योभयत्राप्यविशेषात्, चमत्कारिबोधजनकज्ञानविषयता-वच्छेदकधर्मत्वरूपस्यानुपहसनीयकाव्यलक्षणस्य प्रकाशाद्युक्तलक्षतावच्छेदक-स्योभयवृत्तित्वाच्च काव्यं पठितम्, काव्यं श्रुतम्, काव्यं बुद्धमित्युभयविधव्यवहारदर्शनाच्च काव्यपदप्रवृतिनिमित्तं व्यासज्यवृति । अत एव वेदत्वादेरुभयवृत्तिप्रतिपादक: ‘तदधीते तद्वेद:’इति सूत्रस्थो भगवान् पतञ्जलि: संगच्छते । लक्षणयान्यतरस्मिन्नपि तत्त्वात् ‘एको न द्वौ’ इतिवत् न तदापत्ति: ।”**(९) इति

किञ्च साहित्यशास्त्रपरम्पराया आद्याचार्य: भामह: **“शब्दार्थौ सहितौ काव्यम्”** इति शब्दार्थयो: साहित्यानुरोधेन काव्यस्य यल्लक्षणं प्रतिपादितवान् तदत्र विशिष्टशब्दार्थयो: साहित्यरूपेण काव्यप्रकाशकारेण

 ISSN – 2349-3100

समुपन्यस्तमित्यम्लानमेतत्काव्यलक्षणम् । तथा चोक्तमाचार्येणानन्दवर्धनेन **वाच्यवाचकरचनाप्रपञ्चकाव्य**स्येत्यादिना (१०)। पुनश्च व्यङ्ग्यमुखेन व्यञ्जकमुखेन वा ध्वने: यन्निरूपणम्, यच्च **'अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता'**(११) इत्यादय: परम्पराप्रसिद्धविचारा: शब्दार्थयुगलस्यैव काव्यत्वं प्रख्यापयन्ति।

शब्दस्यैव काव्यत्ववादिनां मतं तु चिन्तनीयमेव। शब्दवादिषु ये पण्डितराजादय: परम्परायां प्रामुख्यं भजन्ते तेषां विचारे विशिष्टस्य शब्दस्य काव्यत्वं ग्राह्यं न तु शब्दार्थयुगलस्य। शब्दार्थयुगलस्य काव्यत्वे प्रमाणाभावं ते स्वीकुर्वन्ति। उपर्युक्तवैदिकलौकिकप्रयोगं दृष्ट्वा प्रमाणाभावकथनं कथमुचितं भातीति त एव प्रमाणम्। पुनश्च शब्दार्थयो: काव्यत्वे व्यासज्यवृत्त्या स्थिते श्लोकवाक्यस्य काव्यत्वं निरस्यतीति तत्र यत्प्रमाणमुपन्यस्तं रसगङ्गाधरे तन्न सहृदयश्लाघ्यत्वमावहति । पुनश्च अस्वादोद्बोधकस्य व्यञ्जकतायां सर्वेषां यन्नाट्याङ्गानां काव्यलक्षणत्वापत्तिर्निर्दिष्टं तत्तु मायामात्रमुपन्यस्तम्, न पुनरत्रास्ति कोऽपि परमार्थ: । यतो हि वर्णपदपदांशवाक्यरचनाप्रबन्धादीनां सर्वेषां प्रायशोऽर्थानां चास्वादव्यञ्जकतायां स्थितायामपि यच्छब्दमात्रस्य काव्यत्वाभिधानं स्वपक्षपातनाभिलाषि तद्वचनजालम्। शब्दार्थयो: काव्यत्वाभिधानं तु ईश्वरेच्छाकृतं न केनापि अपाकरिष्यते । तौ शब्दार्थौ काव्यत्वावच्छिन्नत्वेनातिविशिष्टौ इति कृत्वा विशिष्टयो: शब्दार्थयोर्लक्षणमेव काव्यलक्षणमिति निर्विवादम्।

शब्दार्थयो: काव्यत्वे सर्व एवालङ्कारिका: प्रमाणम्। ये शब्दमात्रस्य काव्यत्वं विवृण्वन्ति तेषां मतेऽप्यर्थवच्छब्दस्य एव ग्रहणं प्रशस्यते न त्वर्थहीनस्य। अत एव रमणीयर्थप्रतिपादकत्वविशिष्टस्य शब्दस्य ग्रहणं पण्डितराजेन विहितम्। इष्टार्थव्यवच्छिन्ना पदावली भवतु रसात्मकं वाक्यम्वा भवतु सर्वत्र अर्थपूर्वकतया शब्दस्य शब्दत्वं गृह्यते। अन्यथा शब्दार्थयो: साहित्याभावे कथं काव्यत्वम् ?

किञ्चात्र काव्ये शब्दार्थावित्यत्र द्वन्द्वः, स च समप्रधान इति शब्दार्थयोः तुल्यप्राधान्यं काव्यमिति शब्दार्थयोः भेदाभेदरूपत्वम् अङ्गीकर्तव्यम्। अर्थात् भेदे सति अभेद अयं हि काव्यशब्दार्थयोरेव भवेत्। एवमेव शब्दार्थयोर्भेदाभेदरूपं स्वीकुर्वता कालिदासेन रघुवंशे – "**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।** " इत्यादिना साहित्यस्वरूपं सुष्ठु प्रतिपादितम्। अत्र निर्दिष्टा वाक् परा यस्या एव अर्थेन सह नित्यसम्बन्धः अर्थात् परावाक् कदाचिदपि अर्थं न व्यभिचरति। यतो हि अनयोः वागर्थयोः प्रकाशविमर्शकत्व-मतो न व्यभिचार:। तदुक्तं लोचने अभिनवगुप्तपादैः क्रमात् प्रख्योपाख्यप्रसरसुभगमित्यादिना अङ्गीकृतम्। अत: शब्दार्थयोरेव साहित्ये काव्यत्वं निर्वाधम्।

## सन्दर्भ संकेताः –

(१) नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति॥ काव्यप्रकाशे मङ्गलपद्यम्।

(२) तत्रैव

(३)साहित्यदर्पण: ३/३

(४)रसगङ्गाधर:/प्रथममाननम्

(५)काव्यालङ्कार: ६/१

(६)काव्यादर्श: १०/१

(७)-क- संक्षेपाद्वाक्यमिष्टार्थव्यवच्छिन्ना पदावली।
काव्यम् स्फुरदलङ्कारं गुणवद् दोषवर्जितम् ॥ अग्निपुराणे ६०७/३३७।
काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयो: शब्दार्थयोर्वर्त्तते। भक्त्या तु शब्दार्थवचनमात्रोऽत्र गृह्यते। वामनस्य काव्यालङ्कारसूत्रवृत्तौ १/१/१।
-ख-ननु शब्दार्थौ काव्यम्। रुद्रटकृते काव्यालङ्कारे १/२

-ग- शब्दार्थौ निर्दोषौ सगुणौ प्राय: सालङ्कारौ काव्यम् । वाग्भटस्य काव्यानुशासने पृ १४ ।

-घ-शब्दार्थौ सहितौ वक्रकविव्यापारशालिनी ।

बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणी ॥ कुन्तकस्य वक्रोक्तिजीविते १/१ ।

-ङ-साधुशब्दार्थसन्दर्भं गुणालङ्कारभूषितम् ।
स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्त्तये ॥ वाग्भटद्वितीयस्य ।

-च-अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम् । हेमचन्द्रस्य काव्यानुशासने पृ १६ ।

-छ-'ललितोचितसन्निवेशचारुण: काव्यस्य' 'विविधवाच्यवाचकरचनाप्रपञ्चचारुण: काव्यस्य' चेत्यादिना आनन्दवर्धनस्य ध्वन्यालोके प्रथमे उद्योते ।

-ज-गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ ।

गद्यपद्योभयमयं काव्यं काव्यविदो विदु: ॥ प्रतापरुद्रयशोभूषणे विद्यानाथस्य पृ ४२ ।

-झ-शब्दार्थौ वपुरस्य तत्र विबुधैरात्माभिधायि ध्वनि: ।विद्याधरस्य एकावल्याम् १३/१

-ञ-तत्र निर्दोषशब्दार्थं गुणवत्त्वे सति स्फुटम् ।
गद्यादिबन्धरूपत्वं काव्यसामान्यलक्षणम् ॥ साहित्यसारे अच्युतरायस्य ।

-ट-काव्यं विशिष्टशब्दार्थसाहित्यसदलङ्कृति: ।कविकण्ठाभरणे क्षेमेन्द्रस्य ।

-ठ- इष्टार्थव्यवच्छिन्नापदावलीति काव्यम् । काव्यदीपिकायां कान्तिचन्द्रस्य ।

-ड-काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत् ।अलङ्कारशेखरे शौद्धदनिन: ।

-ढ- निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम् ।

रसान्वितम् कवि: कुर्वन् कीर्त्तिं प्रीतिञ्च विन्दति ॥ सरस्वतीकण्ठाभरणे भोजराजस्य २/१ ।

-ण-आस्वादजीवातु पदसन्दर्भ: काव्यम् । चण्डीदासस्य काव्यप्रकाशदीपिकायाम् पृ १३।

-त-'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुन: क्वापि' इति काव्यप्रकाशे ४/१।

-थ-'वाक्यं रसात्मकं काव्यम्' साहित्यदर्पणे/३/१ ।

-द-रमणीयार्थप्रतिपादक: शब्द: काव्यम् । जगन्नाथस्य रसगङ्गाधरे १/१ ।

(८)-काव्यप्रकाशे प्रथमोल्लास:-सूत्र-१,पृ-१९

(९)मर्मप्रकाशे पृ.४-५

(१०)ध्वन्यालोके प्रथमोद्यत:,पृ-२६

(११)काव्यप्रकाशे तृतीयोलास:/२३

**अध्यापक:,रा.सं.सं,मुम्बई**

ISSN – 2349-3100

# वैदिकसाहित्ये वास्तुसंगीतकलयोर्विमर्शः

